CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.
Coll. No. 557

Title Cittyupaniṣat Bhāṣya

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 857 Subject: Vedic lit.

Title: Cittyupaniṣat Bhāṣya

Author: — Scribe: Laxmaṇa Vidyādharei.

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 9·5" by 5" Extent: 22 folii

Language: Sanskrit Script: Devanāgarī

Remarks: —

॥त्रिशुपनिषद्भाष्यंलक्ष्मणविद्याधरस्येदं॥

॥ श्रीगणेशाय नमः ॥ यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ॥ निर्ममे
तमहं वंदे विद्यातीर्थमहेश्वरं ॥१॥ स्वाध्यायब्राह्मणे प्रोक्तं द्वितीये हि प्रपाठके ॥ चातुर्हो
त्रचितेर्मंत्रा व्याख्यास्यंतेऽस्मिंस्तृतीयके ॥२॥ ब्राह्मणग्रंथस्य तृतीयकांडे द्वादशप्रपाठके
त्मवै चतुर्होतार इत्यस्मिन्ननुवाके चातुर्होत्रचिते ब्राह्मणमुक्तं न तु तन्मंत्रास्तत्रोक्ता
स्तेषामरण्येऽध्येतव्यत्वात् । अतोऽस्मिन्प्रपाठके तन्मंत्रा उच्यंते । तत्र प्रथमानुवाके
मंत्राणां विनियोगो ब्राह्मण एवमाम्नातः । पुरस्ताद्दशहोतारमुदंचमुपदधाति यु
नदमिति । तस्याठस्तत्र चित्तिः स्रुक् साप्ताध्य ध्रुरिति ॥ आदौ सिसृक्षुः प्रजापतिः स्वार्थं
न चित्त्यामेनाध्यानिके नेष्टवान् ॥ तद्यागवर्तिनः स्रुगादयस्ते तेषु मंत्रेषु प्रतिपाद्यंते ॥ अत्र चित्तिचित्त
शब्दाभ्यां निर्विकल्पकसविकल्पकभेदजनकावंतःकरणवृत्तिभेदौ विवक्षितौ ॥ वाक्वेदिश्च प्रसि
द्धा ॥ आधीतमुच्चार्यमाणं बर्हिः ॥ केतविज्ञातशब्दाभ्यां निर्विकल्पकसविकल्पकज्ञानविषयाव
भिधीयेते ॥ वाक्पतिशब्देन वाचः प्रवर्तकः कंठताल्वादिस्थानेषु संयुज्यमानो वायुरुच्यते ॥ म
नः प्राणे प्रसिद्धे ॥ सामशब्देन धातुर्वर्णोच्चारणशक्तिरुच्यते ॥ एवं चित्तादयो दश शारीरगताः
पदार्थविशेषाः ॥ स्रुगादयो दश पदार्था होमनिष्पादकाः ॥ अग्निदयत्रावेना हवनीयगार्ह
पत्यौ विवक्षितौ ॥ उपवक्तृशब्देनानुवचनकर्ता होता ॥ पुराप्रैषवक्ता मैत्रावरुणो विवक्षितः ॥

पदा प्रेक्षणादिष्वनुज्ञायां पठ्यायां ब्रह्मा समीपे स्थितं प्रोक्षेण्यां दिवा तदनुज्ञां वक्ति तु स्मादयमु
पवक्ता ॥ चित्त्यादयः शरीरपदार्थाः स्रुगादिरूपा इति वाक्यार्थः ॥ अस्मिन्मंत्रे स्रुगादीनां होम
साधनानां दशानामभिहितत्वादयं मंत्रो दशहोतेत्युच्यते ॥ सोऽयं मंत्रस्य पूर्वो भागः ॥ तस्य चावय
वाः पृथगिष्टकामंत्रास्तत्र चित्तिः स्रुगित्यादेवतया गिरस्वच्छ्रवा सीदेत्येवमुपधानप्रकारो द्रष्ट
व्यः ॥ एकादशेष्टका उपधेयाः ॥ मंत्रस्य योयमुत्तरभागो ग्रहारव्यस्तेन ग्रहेष्टकामुपदधाति
॥ तथा च श्रुत्याम्नातं ॥ ग्रथावकोऽयं ग्रहानिति ॥ तं च ग्रहभागमाह ॥ वाचस्प
ध्रु तइत्यादि ॥ हे वाचस्पते या नो पांथा विधे जगद्विधातः नामन्वसर्वस्याज्ञावकर ॥
ते तव नाम विधेम ॥ अस्मदनुग्रहकारी देवाय तस्मै वं प्रसिद्धं नाम नमनं प्रह्व
प्प नायं संपादयाम ॥ त्वमस्माकं नाम विधेः देवेषु मध्ये यजमानोऽयं यथा शास्त्रं
कृतवानिति प्रसिद्धं कुरु ॥ अयं वाचस्पतिर्महीयेषु यागेषु सोमसहितं आज्यं
पिबतु ॥ अस्मासु होमकर्तृषु निरपेक्षितं धनमाधाता संपादयतु ॥ इमं वृत्तांत
मुद्दिश्य ज्ञुधीति स्वकीया वागाह ॥ अतो वाचस्पतइत्यादिन्मोधादित्यंतोऽयं भागः ॥ एतेषां मंत्रा
णामुपधानविनियोगः प्रकरणसिद्धश्चातुर्होत्रब्राह्मणे वाचनिकश्चेसम त्रपिनियोगास्तत्र तत्र

॥ हविः कं ॥ चित्तिः स्रुक् ॥ चित्तमाज्यं ॥ वाग्वेदिः ॥ आधीतं बर्हिः ॥ केतो अग्निः ॥ विज्ञातमग्निः ॥ वा ॥
॥ केतिर्हीता ॥ मन उपवक्ता ॥ प्राणो हविः ॥ सामाध्वर्युः ॥ ३ ॥ वाचस्पते विधे नामन् ॥ विधेम ते नाम ॥ २ ॥ ॥

चस्पतिः सोमं पिबतु। आस्माकुन्नमोधात्स्वाहा॥ अध्वर्युः पंच च॥१॥
वाचनिकास्तेच ब्राह्मणस्य द्वितीयकांडे तृतीयप्रपाठके पर्यायाः प्रपंचिताः॥ तेषु होमाहोमौ तु विषयभेदेन
अश्विहविषय आपस्तंबेन दर्शितः। पत्नीमत्यो ग्रहाः स्वाहाकाराय चाहोमार्था ग्रहा अस्वाहाकारा इति। सोयं मा
यउत्तरे धापि मंत्रे षतुसंधेयः। तदेवमस्मिन्ननुवाके स्वाहा होतृमंत्रोभिहितः। इति माध्वी चेवेदर्थप्रकारो यजुरारण्य
द्वे तृतीयपाठे प्रथमोनुवाकः॥२॥ ॥अथ चतुर्होतृमंत्र उच्यते। तस्य च विनियोगो ब्राह्मणेनैवमभिहितः। दद्भि
एतत् प्रोचं चतुर्होतारमिति। तस्याहस्ति पृथिवी होता० सोयं होतृभागः। अत्र पृथिव्यादयः प्रसिद्धाः। तथा होचाद्य
अथ उपवक्ता राहृत्य समीपे स्थित्वा ततत्कर्म स्वनुजानातीत्युपवक्ता विवक्षितः। अथ ग्रहभागमाह। होता च सते संनतत
मेनासंतं संपादितेन मंत्रेण। स्निग्धया वाचः साम पूर्णेन तमासमेतात यह्वसे। अग्नेयजमानाय वा यं वरणीयं स्रुवः स्वर्गे

आकूत्या आत्मनं ताकुरु। अयं वाचस्पतिरस्मदीयेषु यागेषु सोमं पिबतु। इदं देवमिंद्रियसमृद्ध्यर्थं जनजनत जनयतु ये
इयत्वि सर्षः। तदेतद्द्विरभ्युकुधीति स्वकीयायागाह॥ इति द्वितीयोनुवाकः॥ अथ पंचहोतृमंत्र उच्यते। तद्विनियो
गो ब्राह्मणेनैवमाम्नातः। पश्चाद्दुरं च पंचहोतारमिति। तस्याहस्ते। अग्निराध्वर्युः प्रसिद्धाः। अध्वर्युः प्रतिप्रस्थाता
चेत्येच मध्वर्युर्द्वितीयेन होतृरूपं यक्षुर्वरणीयं। अथ ग्रहभागमाह॥ योयं देवतानामनेच सोमः सोयं लतानामस्य यागे
न्राग्रस्याग मुनेपुरतो गच्छति। मृत्रोनामको देवतादिषु क्रान्तकर्मसु प्रमुखस्य समानतया भासमानस्य पाग स्पुरते
त्वं गछति। अत्र सोमं त्रं पठित्वा पश्चात्सोमो गृह्यते। हे देव देवते बर्हिष्मते सोमाः आत्मनः पन्नी आश्विनाश्वो। द्वाराम्यते। वायुव
द्राक्षिति समागच्छतीति योजा। पित्तस्य रुचनेनाकानं स्पर्शो तीनि रुचनेन तत्तस्य। एतदर्थं अभ्युकुधीति स्वकीयायागाह॥ इति तृतीयोनुवाकः॥३॥

अथ षष्ठहोतृमंत्र उच्यते॥ द्विविधस्तन्मंत्रः। अग्निश्च तुष्पन्निवादिपोत्तः सूर्यंते चक्षुरित्येकः। षष्ठानुवाकेवा ध्वोतेस
परः। सरावचानुहोत्रयनेप्रयोज्यः। वाग्घोता षष्ठो तृणामिति एवं तद्ब्राह्मणे निर्दिष्टत्वात्। सूर्यंते तृतस्तु पशुबंधादेवि
नियोगः। सच होतृब्राह्मणकांडे प्रपठितः। पशुबंधे नयक्ष्यमाणः षष्ठोतारं मन्त्र स्तादुरस्या रुचनीयेन कुमारित्तितत्मंत्र
पाठस्त्वहि पदा। योयं सूर्यः सतेचक्षुः। योवायुः सते प्राणः। तथा च पशुविषये रुचनीये। द्विराये वैसमाम्नायते तस्य
वक्तुर्गमयतात् वातं प्राणमन्ववसृजतादिति। पापोः सहष्टमारा उपरिवर्तित्वसाम्यात्। यदिदमंतरिक्षं तत्व दि

योजीवात्मा। मध्यवर्तित्वसाम्यात्। यानि हृदयादीन्यंगानि तैर्यं त्वं संपादय त्विति शेषः। सूर्यंते चक्षुरित्यादावपि त्वदीय
चक्षुः सूर्यं प्राप्नोत्विति वा योजनीयं। अथ वाचस्पमालं वाचस्पतिसंबोधनमन्त्र घते च स्तेः सूर्यरूपं जानीयादि
त्विवेवाचस्पतिपरतयामंत्रोयोज्यः॥ होमनिष्पादकस्य पात्रस्य श्रुवस्तु रादिनिषङ्गामंत्रोक्तो नीसस्य षष्ठो तत्व
अथ ग्रहभागमाह॥ वाचस्पते अछिद्रयावाचा स्वरात्तरपूर्णया मंत्रेण। अछिद्रपात्रया घृतसंपूर्णया स्रुचा।
देवाहृध देवानां वर्धयित्री। होत्रां होमक्रियां। दिविषु क्षेत्र यस्त्वं सर्वतः प्रेरय। एतमर्थं मनुद्दिश्य अभ्युकुधीतिस्व
कीयायागाह॥ ॥इति चतुर्थोनुवाकः॥४॥

अथ सप्तहोतृमन्त्र उच्यते। तस्य च विनियोगश्चातुर्होत्रब्राह्मण एवमाम्नातः। उपरिष्टात्स
प्त सप्तहोतारमिति। तत्पाठस्तु। महाहविः सप्तहविरित्यादयो ऽ याः पठ्यन्ताः सप्तसंख्याकाः महर्षयः न
तन्महर्षिरूपा अत्र साहोत्रादयः। य एतस्य सोमयागस्याभिगरो अभित उन्नेतुः पुरस्तात् सभ्या अग्नीध
तमस्तात् प्रतिहारभागो गायत इति प्रस्तोता प्रतिहर्ताभिगरौ। होताध्वर्युरग्नीध्रो ब्रह्मा प्रस्तोता
प्रतिहर्ता उद्गातेति सप्तसंख्याकाः होमनिष्पादकाः अस्य मन्त्रः सप्तहोतृ उच्यते। अथ गृहभोगमाह। हे
वाचस्पते हे हृद विधे हृदस्य विधातः अश्चित्तप्रेरके यथः। हे नामन् सर्वजगत्संबन्धिभाणि। हे तथुक्त। तेल
स्यं नामन मनं प्रणति विधेम कुर्मः। त्वं चास्माकं नाम विधेः देवानाम धोस्म्य गिष्टवानि। तिप्र सिद्धं नाम

२ २

धेयं कुरु। अयं वाचस्पतिः सोममपात् पीतवान्। दैव्यस्तंतुर्मध्येह विःस्वीकारार्थमागतो देवसंबंधी
संतानो माच्छेदि कदाचिदपि छिन्नो माभूत्। तथा मनुष्यस्तंतुः ऋत्विक् भवाहो पिविच्छिन्नो माभूत्। द्यावापृ
थिवीभ्यां नमोस्तु। तमिममर्थमुद्दिश्य जुहुधीति स्वकीया वागाह॥ इति पंचमोनुवाकः॥ ॥अथापरः
षड्ढोतृमंत्र उच्यते। तस्य चाविनियोगश्चातुर्होत्रब्राह्मण एवमाम्नातः। उत्तरतः प्राचः षड्ढोतारमिति॥
तत्पाठस्तु॥५५॥ ५१॥

अथानंतरभाविनोनुवाकस्य चातुर्होत्रेषु केशानिवर्तनेषु तद्दतं तत्सप्तमिति जपिसाय अथाजुपमाहापसं
नः। ब्राह्मण एकहोतेति चानुवाकमिति। तथा ब्रह्ममेधे द्रवृतो जस्यानुमंत्रणविनियोगं भारद्वाज आह ब्रा
ह्मण एकहोतेति च। एकानुवाकगतेषु दशसु पर्यायेषु प्रथमपर्यायमाह। योयं वेदवित् ब्राह्मणः सोयमेके
न स्वकीयेन तपसा जुहोति सर्वस्य जगत उपकरोति। एकहोता स एव ज्योतिष्टोमादिनिष्पादकेन आघस्य रूपस्य
तादृशो ब्राह्मणो मे मह्यं प्रजादिचतुष्टयं ददातु तत्प्रसादाद्यज्ञोपि मे सर्वदा भूयात्॥१॥ द्वितीयपर्यायमाह॥

द्वाभ्यां पाकहविर्वहनाभ्यामुपकरोतीति द्विहोता। अत एव पोषकत्वादग्निः। अन्यत्पूर्ववद्व्याख्येयं॥२॥
तृतीयमाह॥ त्रिभिरग्निभिर्यागैरुपकरोतीति त्रिहोतृत्वं॥३॥ चतुर्थमाह॥ जरायुजादिचतुर्विधानवक्षत्र
नेनोपकरोतीति चतुर्होता ऽ तएव विद्वत्सु प्रजासु हितत्वेन। स्थितो विष्णुः॥४॥ पंचममाह॥ पंचभिः प्राणनाडी
वृत्तिभिरुपकरोतीति पंचहोतृत्वं॥ वायोः प्राणरूपत्वं प्रसिद्धं॥५॥ अथ षष्ठमाह॥ षण्णामृतूनां निष्पादकत्वा
न् षड्ढोतृत्वं। चंद्रमा हि द्वयपक्षयाभ्यां शुक्लकृष्णपक्षद्वारा ऋतून् कल्पयति। अत एवान्यत्राम्नातं। ऋतूनां
यो दध जायते पुनरिति॥६॥ सप्तमं पर्यायमाह॥ मसानां शीर्षण्यानां प्राणवृत्तीनां पोषकत्वेन सप्तहोतृत्वं॥

आरोगः। भ्राजः। पटरः। पतंगः। स्वर्णरः। ज्योतिषीमान्। विभासः। कश्यपः। २

४ अत एव प्राणपोषकत्वात् प्राणस्य प्राण इत्युच्यते॥७॥ अष्टममाह॥ आरोगादिभिः कश्यपांतैरष्टभिः
सूर्यैरुपकरोतीत्यष्टहोतृत्वं। द्युलोकस्यैकेनापि निराकर्तुमशक्यत्वादनाधृष्यत्वं। नवम
माह। पूर्वोक्तैरष्टभिर्मूर्तिभिः सप्तत्वानुगतेन सामान्यरूपेण च नवधोपकारान्नवहोतृत्वं। तेजश्चि
समादित्यस्य सिद्धं॥९॥ दशममाह॥ नवै वै पुरुषे प्राणाः। नाभिर्दशमीति श्रुता निशरीरगतानि द
शच्छिद्राणि तद्द्योपकारित्वाद्दशहोतृत्वं। सर्वजगत्कारणत्वेन सर्वात्मकत्वं प्रजापतेः प्रसिद्धमिति॥ ४

सप्तमोनुवाकः॥७॥ ॥अथ संभारयजूंष्युच्यंते। तेषां चेष्टकोपधाने विनियोगश्चानुहोत्रीयब्राह्म
णेभिहितः। हृदयं यजूंषि पत्न्यश्चेति। तेषामेकविंशतिसंख्यानां यजुषामग्निसवित्रादयो देवाः
यजुःस्तोमादीनि यज्ञसंभरणीयान्यंगानि। एते देवास्तैः संभरणीयैः सह वाक्कर्मण्यागच्छंतिति वा
क्यार्थः। उक्थामदत्रा ब्द उक्थशस्त्रवाची। यज्ञशब्दो हविःप्रक्षेपवाची। स्वगाकारः संयुवामंत्रः। पुरोधा
ग्रहणकाले पठनीया पुरोधान्नू। पवित्रशब्दो दशापवित्रवाची। अहं यजमानः श्रद्धया सह आग
च्छामि। स्पष्टमन्यत्॥ ॥इत्यष्टमोनुवाकः॥८॥ ध॥ ध॥ ध॥ ध॥ ध॥ ध॥ ध॥ ध॥ ध॥ ध॥ ध॥

अथ देवपत्न्याख्यामंत्रा उच्यंते। तेषां च विनियोगः पूर्ववद्द्रष्टव्यः॥ पत्न्यश्चेत्येवं। तत्र पत्नीष्ट
कानामभिधानात्। तत्सग्रहस्तः। देवा इंद्रादयः सेनादयः पत्न्यः। दिग्भिर्दिगादयोपि केषांचि
द्देवानां पत्न्यः। एताः सर्वाः आगस्य यज्ञमेव केवलं कुर्वंत्विति वाक्यार्थः। अत्राम्नातिः षड्वि
शतिसंख्याकाः पत्नीष्टकाः पदध्यात्। इति नवमोनुवाकः॥९॥ ॥अ
थ प्रतिग्रहमंत्रा उच्यंते। प्रतिग्रहेष्टकोपधानं चानुहोत्रब्राह्मणे आम्नातं यावकाश

प्रतिग्रहान्लोकं पृणाश्चेति। तत्र प्रथममंत्रमाह हे प्रतिगृह्यमाण द्रव्य सवितुर्देव
स्य प्रेरणे वर्तमानोऽहं अश्विनोः संबंधिभ्यां बाहुभ्यां पूषसंबंधिभ्यां हस्ताभ्यां त्वां प्र
तिगृह्णामि। हे दक्षिणे देवि वरुणो राजा हिरण्यरूपां त्वाम् मह्यं प्रापयतु। तेना
ग्निप्रापणेन प्रतिग्रहदोषाभावादमृतत्वं नरकाभावरूपं प्राप्नुयाम्। इयं च
दक्षिणा दात्रे च यो स्तु पाक्षी भूत्वा दातारं स्वर्गं नयतु इत्यर्थः। प्रतिग्रही
त्रे मह्यं मयः सुखकरमस्तु रुद्रकः प्रजापतिः कस्मै प्रजापतये दत्तवान्। अन्

५ यमिरूपेण या प्रतिग्रहीत्रे प्रेरकत्वात्। तथा कामः कामायदत्तवान्। यथा
प्रजापतिरदृष्टप्रेरकस्तथा कामस्यादृष्टप्रेरकत्वात्काम एव दाता प्रतिग्र
हीता च। फलविषयः कामो दाता ऐहिकस्य विषयः कामः प्रतिग्रहीता। ऽसौ
हि दक्षिणे समुद्रं तत्समानं कामं प्रविशाकामेन निमित्तेन त्वा प्रतिगृह्णा
मि हे मद्हृदयवर्त्तिकाम। एतत्ते तवैतिद्दृष्टं वस्तु पर्यं भवति। हे काम तत्त्वदर्थं

मेवैषा दक्षिणा वृत्ता। अंगिरोभिः समुच्चयं वृत्ता नारव्यो महर्षित्वं प्रतिगृ
ह्णातु॥४॥ अथ वस्त्रादिद्रव्यविषयान्षोडशमंत्रानाह। एतेषु सर्वेषु ५
द्विविदक्षिणेषु स्यात्: पूर्वानुषंगस्तेनामृतत्वमश्यामि। सोऽदिरुत्तरानु
षंगः तस्य रथप्रतिग्रहमंत्रस्य प्रथमपूर्वोत्तरानुषंगः पूर्वभाविनीकां
दृचमाह॥ वैश्वानरस्त्वा देवः प्रत्नयातु रातनशरीरधारी सन्स्वर्गमा
रूढयान्। स च दिवः एव द्युलोकस्योपरि भागं मन्म मिमेनान विशेषेर्मे

दमानः कल्याणं कुर्वन्वर्त्तते॥ अयं यजमान इमां दक्षिणां दत्तवानिसेवं यदिय मन्मा मा अग्ने स्मारयतीत्यर्थः।
न स वैश्वानरो अंतवे प्राणिरूपाय यजमानाय धनं प्रववं जनयत्॥ यजमानः पुरा यथा दक्षिणां दत्तवान्॥
तथैव तदनुरूपं फलं जनयति। स वैश्वानरो जागृविः सावधानः सन् अत्यास्वर्गगमनशीलः। समानं
परियाति। यावद्दक्षिणार्थं द्रव्यं तेन सदृशं यथायोग्यं फलं तस्मै प्रापयति॥ अस्या ऋचः उपरितनं रथप्र
तिग्रहमाह॥ अनृतेनामृतत्वमश्यामित्यादिरुत्तरानुषंगः सर्वमंत्रसाधारण इति दर्शयितुं प्रथममंत्रे पठि

तोऽपि पुनराम्नातः। रक्षो त्वेत्यादि वैश्वानरायरथमिस्यंतः पूर्वोक्ताया ऋच उपरिरथमंत्रे पुनः पठनीय
इसेतावान्विशेषः। एतैर्मंत्रैः प्रतिग्रहेष्टका उपदध्यात्॥ ॥इति दशमोऽनुवाकः॥ अथ होतृहृदयाख्य
मंत्रा अत्राभिधीयंते॥ तेषामिष्टकोपधाने विनियोगश्चातुर्होत्रीयब्राह्मणे एवाम्नातः। हृदयं यजुः
षि पत्न्यश्चेति॥ तत्र दशहोतृहृदयाख्यमंत्रमाह॥ चित्तिः स्रुगित्यादिनां होतृमंत्राणां हृदयं रहस्यत
त्त्वं परमात्मस्वरूपं प्रतिपादयती सनुवाको हृदयमित्युच्यते। तत्रानेन मंत्रेण दशहोतृहृदयं प
रमात्मतत्त्वमुच्यते। अस्मिन्मंत्रे द्वितीया द्विपदा। इतरास्तिस्रश्चतुष्पदा ऋचो विवेकः॥ ५॥ ५॥

ऋ।४

६ तत्र प्रथमामृचमाह॥ सुवर्णमिति। अहं मंत्रद्रष्टा इंद्रस्य परमेश्वरस्यात्मानं निजस्वरूपं परिवेद। प
रितः सर्वत्राव स्थितं जानामि। कीदृशमात्मानं। सुवर्णं सुवर्णसदृशं। यथा सुवर्णं स्वत एव भासमानं भ
वति तथास्य प्रकाशं। धर्मी अन्यस्य वस्तुनः प्रकाशकं। तस्य भासा सर्वमिदं विभातीति श्रुतेः। वेनं कांत॥
सर्वदुःखहरा हि त्येन तत्स्यैं मनीषवं। दशधा। चित्तिः स्रुग्गित्यादि दशहोतृमंत्रप्रतिपादितेनाकाशेन्द्रिय
वंतं लोके व्यवहरंतं। अतः समुद्रस्य मध्ये स्रष्टुः पुरा सर्वं व्याप्यावस्थितो योयं जलसंघः सोयं
समुद्रस्तस्य मध्ये मनसाचरंतं। इदं सर्वं जगत् सृजेयेत्येवंरूपेण मनोवृत्तिविशेषेण सह प्रवर्त्तमानं। अ
त एवान्यत्रोक्तं। आपो इदमासन् सलिलमेव। स प्रजापतिरेकः पुष्करपर्णे समभवत्। तस्यांतर्मनसि
कामः समवर्त्तत। इदं सृजेयमिति। ब्रह्मा चतुर्मुखः प्रजापतिः। अपि अपि एवं यथोक्तं समुद्रं दशहोतार

ह

दशहोतृमंत्रेण प्रतिपाद्यरूपेण विभ्रंतं परमात्मानमन्वविंदत् सृष्टिसाधनत्वेन अन्वेष्य
लब्धवान्। तथा च ब्राह्मणे आम्नातं। प्रजापतिरकामयत प्रजाः सृजेयेति॥१॥ द्वितीयामृचमाह॥ सो ६
यमेवंविधः परमात्मा जनानां सर्वेषां शास्ता। अंतर्यामिरूपेण नियामकः सन् हृदयं प्रविश्यावस्थितः।
ईश्वरः सर्वभूतानां हृद्देशेर्जुन तिष्ठति। भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया इति॥ स चांतर्यामी स्वकी
येनैवेश्वररूपेणैक एव सन् पुनर्जीवरूपेण बहुधा भूत्वा विचारः विविधाचरणवान् भवति। अत एव
यत्रोपनिषदि श्रूयते। एक एव हि भूतात्मा भूते भूते व्यवस्थितः। एकधा बहुधा चैव दृश्यते जलचंद्रवदिति॥२॥५॥६॥

अथ तृतीयामृचमाह। शतं शुक्राणि शतसंख्योपलक्षितान्यनंतानि सूर्यचंद्रनक्षत्ररूपाणि ज्योतींषि य
त्र यस्मिन्परमात्मन्येकं भवंति एकत्वं प्राप्नुवंति। तथा सर्वे वेदा ऋग्वेदप्रभृतयश्चत्वारो वेदा नानाविधशा
खोपेता यत्र यस्मिन्नेकी भवंति। तथा सर्वे होतारश्च होमकर्तारः सर्वे यजमाना दशहोत्रादिमंत्रा वा यस्मिन्
परमात्मन्येकत्वं प्राप्नुवंति। यथाबुद्बुदा जलमध्ये समुत्पद्य कंचित्कालमवस्थाय विलीयमाना जल एवैकत्वं
प्राप्नुवंति तथा सर्वे भावाः परब्रह्मण्येवोत्पद्य तत्रैवावस्थित्वा विलीयमाना एकतां गच्छंति। अत एवोपनि
षदि श्रूयते। यतो वा इमानि भूतानि जायंते। येन जातानि जीवंति। यत्प्रयंत्यभिसंविशंतीति। तद्वि
जिज्ञासस्व तद्ब्रह्मेति। स तादृश ईश्वरः सर्वेषां जनानामात्मस्वरूपभूतस्तस्मा आत्मने नमः। योगयु
॥तात्र शुक्राणि यत्रैकं भवंति। सर्वे वेदा यत्रैकं भवंति। सर्वे होतारो यत्रैकं भवंति। समानसीन आ
॥त्मा जनानां॥३॥ अंतः प्रविष्टः शास्ता जनानां सर्वात्मा। सर्वाः प्रजा यत्रैकं भवंति। चतुर्होता
॥रो यत्र संपदं गच्छंति देवैः। समानसीन आत्मा जनानां॥४॥५॥६॥७॥८॥९॥१०॥११॥
केन मनसोपलभ्यो भवति। तथा च कठे आधीयते। मनसैवेदमाप्तव्यं नेह नानास्ति किंचनेति। ततो
योगिनो मनसः प्रत्यक्षगम्यत्वात्॥३॥ चतुर्थीमृचमाह॥ अंतः प्रविष्टः शास्ता जनानामिति। योयमुक्तः
सोयं सर्वात्मा सर्वेषां प्राणिनामात्मस्वरूपभूतः। सर्वे हि जना योगेन निरुद्धचित्ताः संतो जगदीश्व
रं स्वस्वरूपत्वेनैव साक्षात्कुर्वंति न तु भेदेन पश्यंति। अतः पूर्वोक्त एवार्थ उपपन्नः खलु वसंकीर्त्य
ते। सर्वा देवमनुष्यादयः प्रजा यत्र यस्मिन्प्रतिपाद्ये देवैः सह यस्मिन्ब्रह्मणि संपदं सम्यगेकीभ
वं गच्छंति प्राप्नुवंति। स तादृशो ब्रह्मस्वरूप आत्मा मानसीनो मानसप्रत्यक्षः सर्वेषां जनानामित्य
र्थः पादपुनरुक्तिर्द्रष्टव्या। अत्र चतुर्होतृशब्देन दशहोत्रादयः सर्वे मंत्रा विवक्ष्यंते। तथा
च ब्राह्मणे चतुर्होतृ देवं प्रजापतिर्वरं ददातवानन्। सर्वे मे नेदिष्ठं हूतः प्रत्यश्रौषीः। सयेनानास्व्या
तारः इति। तस्माच्चतुर्होतारः इत्याचक्षते। तदेवं दशहोत्रादयो मंत्रोक्ति हितः॥४॥५॥

७

अथ चतुर्होतृहृदयाख्यो मंत्रोऽभिधीयते। तत्र तिस्रोऽऋचस्तासु प्रथमामृचमाह॥ ब्रह्मेति। ब्रह्मा
चतुर्मुख इंद्रं परमैश्वर्ययुक्तं परमात्मानं तपसान्वविंदत्॥ अन्विष्य लब्धवान्। दर्शपूर्णमास
सृष्टिसाधनं किमिति विचार्य चतुर्होतृमंत्ररूपेणावस्थितं परमात्मानं निश्चितवानित्यर्थः। तथा च
ब्राह्मणमाम्नाति। प्रजापतिरकामयत दर्शपूर्णमासौ सृजेयेति स एतं चतुर्होतारमपश्यदिति। की
दृशमिंद्रं। जगतः प्रतिष्ठामधिं। सर्वस्य जगत आधाररूपो यो यं चातुर्होत्रियचितिरूपोऽग्निस्तं। स्व
दिवमात्मानं सवितारं। द्युलोकस्य प्रकाशकत्वेनात्मप्राणो यो यमवस्थितः सविता तद्रूपं तथा बृह

॥ ब्रह्मेंद्रमग्निं जगतः प्रतिष्ठां। दिव आत्मानं स्सवितारं बृहस्पतिं। चतुर्होतारं प्रदिशोनुकॢप्तं।
॥ वाचो वीर्यं तपसान्वविंदत्॥१॥ अंतः प्रविष्टं कर्त्तारमेतं त्वष्टारं रूपाणि विकुर्वंतं।
। विपश्चिं॥ अमृतस्य प्राणमेतं॥

स्पतिं। योयं देवगुरुस्तद्रूपेणावस्थितं। प्रदिशः सर्वान् प्रदेशाननुकॢप्तं सर्वे
षु प्रदेशेष्ववस्थितं। चतुर्होतारं पृथिवी होतेत्यादिमंत्ररूपं। वाचो वीर्यं स
र्वस्या वेदरूपाया वाचः सारभूतं॥१॥ द्वितीयामृचमाह॥ अंतरिति।
कवयो विद्वांसो वेदशास्त्रपारंगताः। चतुर्होतृणां चतुर्होतृशब्दे
नाभिधीयमानानां सर्वेषां होतृमंत्राणामात्मानं स्वरूपभूतं परमेश्वरं
निचिक्युर्निश्चितवंतः। कीदृशमात्मानं। अंतः प्रविष्टं जीवरूपेण श
रीरेषु प्रविश्यावस्थितं। अत एवाम्नायते। अनेन जीवेनात्मनानुप्रविश्येति। [illegible]

प्रतीतमानं लौकिकवैदिकसर्वक्रियानिष्पादकं। एतच्चाम्नातं। एष द्रष्टा स्प्रष्टा श्रोता घ्रातार
सयिता मंता बोद्धा कर्ता विज्ञानात्मा पुरुष इति। रूपाणि विकुर्वंतं त्वष्टारं। गर्भेषु देवतिर्यङ्मनुष्यादिरूपा
णि विचित्रं निष्पादयंतं त्वष्टृदेवतास्वरूपं। एतदप्याम्नातं। यो वै रेतसः सिक्तस्य त्वष्टा रूपाणि विकरो
ति तावद्वो वै तत्प्रजायत इति। विपश्चितं नरूपनिमणिप्रकाराभिज्ञं। अमृतस्य प्राणं। अमृतस्य परमात्म
नोऽव्यवहारहेतुभूतप्राणोपाधिस्वरूपं। एतदप्याथर्वणिका आमनंति। कस्मिन्वाहमुत्क्रांते उत्क्रांतो भवि
ष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजतेति। यज्ञमेतं सर्वैरनुष्ठीयमानत्वेन श्रूयमाणमि
तं दर्शपूर्णमासयज्ञस्वरूपं। चतुर्होतृमंत्रस्य तद्यज्ञसृष्टिसाधनत्वात्तद्रूपसंयुक्तं। तद्यज्ञसाधनत्वं ब्राह्मणे सम
॥ चतुर्होतृणामात्मानं कवयो निचिक्युः॥२॥ अंतः प्रविष्टं कर्त्तारमेतं। देवानां बंधुं निहितं गुहासु।
॥ अमृतेन कॢप्तं यज्ञमेतं। चतुर्होतृणामात्मानं कवयो निचिक्युः॥३॥ शतं नियुतः परिवेद विश्वा वि
॥ श्ववारः। विश्वमिदं वृणाति। इंद्रस्यात्मा निहितः पंचहोता। अमृतं देवानामायुः प्रजानां॥१॥८१
म्नातं स एतं चतुर्होतारमपश्यत् तं मनसानुद्रुत्याहवनीये जुहोत्ततो वै स दर्शपूर्णमासावसृजतेति।२॥
तृतीयामृचमाह॥ अंतरिति। योयं परमात्मा सोयं देवानां बंधुः प्रियः। तादृशो देवेषु पक्षपातेन विजयहेतुः॥ अ
त एव तलवकारा आमनंति। ब्रह्म ह देवेभ्यो विजिग्य इति। गुहासु बुद्धिषु निहितं साक्षित्वेनावस्थितं। यो वेद निहितं
गुहायामित्यादिश्रुतेः। अमृतेन स्वर्गफलेन निमित्तेन कॢप्तं संपादितं। एतं यज्ञमित्यादि पूर्ववत्। तदेवमुक्तरूपं
चतुर्होतृहृदयमुक्तं॥३॥ अथ पंचहोतृहृदयं तत्र प्रथमामृचमाह॥ शतमिति। पंचहोता अग्निर्होतेत्यादिपं
चहोतृमंत्ररूप आत्मा। स च विश्ववारः सर्वैर्वरणीयो वायुरूपः। शतं नियुतः शतसंख्याकान् स्वकीयान्
श्वान्परिवेद परितः संचारित्वेन जानाति। अत एवेदं विश्वं जगत् वृणाति व्याप्नोति। सोयमिंद्रस्यात्मा पर
श्वरस्य स्वरूपभूतः सन्निहितः सर्वत्रावस्थितः। स च देवानाममृतं यच्छति प्रजानामायुः प्रयच्छतीति शेषः॥१॥

७

अथ द्वितीयामृचमाह॥इंद्रमिति।एतं पंचहोतृदेवं कवयः पंडिता निचिक्युर्निश्चितवंतः।कीदृशं।इंद्रं परमैश्वर्ययुक्तं।
राजानं दीप्यमानं।सवितारं प्रेरकं।वायोरात्मानं स्वरूपभूतं।ते कवय एतं पंचहोतृदेवं ऋतस्य परब्रह्मणः प
देस्थाने निपांति नितरां पालयंति।तद्रूपत्वेन पश्यंतीत्यर्थः।कीदृशं।रश्मीनां दृश्यमानानां किरणानां मध्ये।स्थि
तत्वात् तपंतं जगत्तापयंतं।रश्मिशब्दरूपमादित्यमित्यर्थः॥२॥तृतीयामाह॥य आंडेति।यश्च होतृदेव आंडको
शे ब्रह्मांडमध्ये।अनिर्भिन्नः सन् भेदेनावस्थितः सन् भुवनं तत्तद्भूतजातं बिभर्ति धारयति।अथ ब्रह्मां
१ ॥इंद्र१ राजानं२ सवितारमेतं।वायोरात्मानं कवयो निचिक्युः।रश्मिं२ रश्मीनां मध्ये तपंतं।ऋतस्य
॥पदे कवयो निपांति॥२॥य आंडकोशे भुवनं बिभर्ति।अनिर्भिन्नः सन्नथ लोकान्विचष्टे।
॥यस्यांडकोशं१ शुष्ममाहुः प्राणमुल्वं।तेन क्लृप्तोऽमृतेनाहमस्मि॥३॥५॥५॥५॥५॥५॥५॥
डभेदानंतरं तद्देहतः स्थितान् भूरादिलोकान् विचष्टे विशेषेण प्रख्यापयति।यस्य पंचहोतृदेवस्य।अंडको
शं शुष्मं उल्बं प्राणरूपमाहुः पंडिताः।तेन पंचहोतृरूपेण परमात्मना क्लृप्तोऽहं व्यवहारसमर्थोऽस्मि भो सादि
तो।स्मि॥३॥अथ षड्ढोतृहृदयमंत्राः।तत्र प्रथमामृचमाह॥सुवर्णकोशमिति।वाक्योतेति मंत्रः षड्ढोता।
स एव ब्रह्मांडकोशमध्ये चंद्ररूपेणावस्थितः।तं चंद्ररूपं षड्ढोतृदेवं तपस्याभिज्ञाः सुवर्णत्वादिगुण
युक्तमाचक्षते।सुवर्णं शोभनवर्णोपेतं।चंद्रमंडलं हिरण्मयवर्णोपेतं भासते।कोशं ब्रह्मांडको
शमध्ये स्थं।रजसा रंजनात्मकेनामृतेन परीवृतं सर्वतो व्याप्तं।तथाविधं चंद्रं तामुकलं तादृशीमेव भा २
गरूपामाचक्षते।कीदृशीमिति तदुच्यते।देवानां वसुधानीं।वन्हिरव्यादीनां देवानामपेक्षितं
यद्वसु च्यमृतं तत्स्य धारयित्रीं।अत एव स्मर्यते।प्रथमां पिबते वन्हिर्द्वितीयां पिबते रविरित्यादि।

विराजं विशेषेण राजमानं।अमृतस्य पूर्णां पीयूषेण परितः॥एवं रूपं षड्ढोतृदेवमभिज्ञा एव स्मरंति।तिस्र
यंते।प्राकृतस्तु जनः षड्ढोतृदेवस्य पादमेश प्रभूतं चंद्रं किल विविक्तेनैव जानाति॥१॥अथ द्वितीयामृचमाह॥म
येन तं चयद्ग्ति।येन चंद्ररूपेण षड्ढोतृदेवेनेवं संततादृतवः पंचप्रकाराः कॢप्ताः संपादिताः हेमंतशिशिरयोः सहैक्या
येनत्तं चयद्ग्ति।मनसा संकल्पमात्रे
णेन परत्व।उत तथा षड्धा।अथवा हेमंतशिशिरयोर्विभागेन षट्प्रकाराः कॢप्ताः।मनसा संकल्पमात्रे
ण संपादिताः।तं चंद्ररूपं षड्ढोतृदेवं ऋतुभिः पंचधा षड्धा वा भिन्नो वै संतादिभिः कल्प्यमानं सर्व
व्यवहारसमर्थीकृतस्य पदे परब्रह्मणः स्थाने कवयो वेदरहस्याभिज्ञाः निपांति नितरां पा
यंति।परब्रह्मणोऽधायं चंद्ररूपः षड्ढोतृदेवमुपासतइत्यर्थः॥२॥अथ तृतीयामाह॥अंतरिति।
॥सुवर्णकोशं१ रजसा परिवृतं।देवानां वसुधानीं विराजं।अमृतस्य पूर्णां तामु कलां विचक्षते॥
॥पादं२ षड्ढोतुर्न किलाविवित्से।येनर्तवः पंचधोत क्लृप्ताः।उत वा षड्धा मनसोत क्लृप्ताः।तं२॥
२ ॥षड्ढोतुर्ऋतुभिः कल्प्यमानं।ऋतस्य पदे कवयो निपांति॥२॥ ७॥ ॥श्रीगुरवे नमः॥ ॥

देवाः सर्वे सहैव संतं स्वर्कं यत्तद्यत्वेन जीवात्मना सहैव वा च स्थितं एतं षड्ढोतृदेवं परमात्मानं विज्ञा
नंति।वेदाभ्यासमंतरेण हृदये स्थितोऽयं परमात्मैवेति विशेषेण न जानंति।कीदृशं परमात्मानं। शे २
अंतः प्रविष्टं।अंतर्यामिरूपेण सर्वेषां पृथिव्यादिपदार्थानां मध्ये च स्थितं।एतत्र वाङ्मनसेनैवं
र्यामि ब्राह्मणे यः पृथिव्यां तिष्ठन्नित्यादिना बहुधा मनंति।कर्तारं नियामकत्वेन सर्वस्य नि
यामकं।अंतश्चंद्रमसि चंद्रमंडलमध्ये मनसा संकल्पमात्रेण चरंतं।एतच्चोपलक्षणं कं २
सर्वेषु पिंडस्तत्सु चरंतमित्यर्थः।एतद्देवस्य हृद्यं कृतं शतधा च रतमिति॥१॥इद्धस्य परमैश्व
र्ययुक्तस्यात्मानं स्वरूपभूतं॥३॥अथ सप्तहोतृहृदयमंत्राः।तत्र प्रथमामृचं
माह॥महाहविर्होतेत्ययं सप्तहोता।स च सप्त धा विक्लृप्तः होता ध्वर्युप्रमुखैः सप्त

प्रकारेण संपादितान्तःस्वकीयं रूपमित्युच्यते। इंद्रः परमैश्वर्ययुक्तः॥ राजा दीप्यमानः परमात्मा जग
न्तईशे स्वामी भवति। स एवार्थः सप्तहोतृरूपदर्शयेर्थः॥२॥ द्वितीयामाह। परे ऐतिति। ब्रह्मा प्रजापति
र्देवानामिंद्रादीनां हृदयं हृदि स्थितं परमात्मानमन्वविंदत् निश्चयेन [illegible] धवान्। कीदृशं तं गुप
रमेण अविच्छिन्नस्य यज्ञस्य परस्तात्फलदशायां परिखिद्यमानं [illegible] रूपेण [illegible] मा
नं। अंतरादित्ये आदित्यमंडलमध्ये मनसा संकल्पमात्रेण आचरत्॥३॥ तृतीयामाह। ब्रह्मेति। ब्र
ह्माच्चतुर्मुखः प्रजायते ब्रह्मणा वेदस्य सकाशे एतत् सप्तहोतृत्वं कुमारसारस्वतेनाद्रुतवान्॥

॥ अंतः प्रविष्टं कर्त्तारमेतं अंतश्चंद्रमसि मनसा चरंतं। सहैव संतं न विजानंति देवाः॥ इंद्रस्यात्मा
नं शतधा चरंतं॥१॥ इंद्रो राजा जगतो य ईशे। सप्तहोता सप्तधा विक्लृप्तः॥५॥ परेण तंतु
परिषिच्यमानं। अंतरादित्ये मनसा चरंतं देवानां हृदयं ब्रह्मान्वविंदत्॥२॥ ब्रह्मैतद्ब्रह्म
णउ कुमारः। अर्कं ज्योतिः सरिरस्य मध्ये॥३॥ आ यस्मिन्त्सप्त पेरवः। मेहंति बहुलां
श्रियं। बह्वश्वामिंद्र गोमती॥४॥ अच्युतां बहुलां श्रियं। स हरिर्वसुवित्तमः। पेरुरिंद्राय
पिन्वते। बह्वश्वामिंद्र गोमतीं॥५॥ अच्युतां बहुलां श्रियं। मह्यमिंद्रो नियच्छतु॥६॥

कीदृशं अर्कं सूर्यरूपेण स्थितं। सरिरस्य मेघस्य जलस्य मध्ये रश्मिद्वारा प्रविश्य ज्योतिः तं
र्तितं॥३॥ चतुर्थीं चमाह। आयस्मिन्निति। यस्मिन् सप्तहोतृस्वरूपे आदित्ये पेरवः छिद्र
दानेन लोकपालकाः सप्तसंख्याकाः रश्मयः आश्रिताः। रश्मिसप्तकं च सांकेज्ञानां सप्तथा
माहरेकऊर्मिस्तत्र प्रयंचितः। ते च सप्तरश्मयो बहुलां श्रियं सस्यादादि संपदं मेहंति वृष्टिसे ॥ १२ ॥
चनद्वारा संपादयंति। हे इंद्र सप्तहोतृदेव परमेश्वर बह्वश्वां बहुभिरश्वैरुपेतां गोमतीं बहुभि

र्गोरुपेतां श्रियं प्रयच्छेति शेषः॥४॥ पंचमीमाह॥ स देवः हरिः पापहरणशीलः वसुवित्तमः अ
तिशयेन धनस्य लब्धा देः। पेरुः पालकः। यत्पादिद्वारा इंद्राय परमैश्वर्ययुक्ताय सप्तहोतृदेवाय पि
न्वते प्रीणाति येन ह्यं। श्रियं हे इंद्र देव मह्यं यच्छेति शेषः। कीदृशीं श्रियं अच्युतां विनाशरहितां। बहुलां
गवाश्वादिभिः प्रभूतां॥५॥ अथ षष्ठीमाह॥ इंद्रः परमैश्वर्ययुक्तः सप्तहोतृदेवः। स्पष्टमन्यत्॥६॥
सप्तमीमाह॥ अस्यादित्यस्वरूपस्य सप्तहोतृदेवस्य। हरीणामंधकारहरणशीलानां रश्मीनां
शतं शताः शतसंख्याकानि शतान्ययुतसंख्याकानी सहस्र्थः। युक्तायुक्तानि संपादितानि। इंद्रः परमैश्व
र्य ॥ शतं शता अस्य युक्ता हरीणां। अर्वाङायातु वसुभी रश्मिरिंद्रः। प्रमंहमाणो बहुलां र
॥ श्रियं। रश्मिरिंद्रः सविता मे नियच्छतु॥७॥ घृतं तेजो मधुमद् इंद्रियं। मय्ययमग्निर्दधातु। च
॥ हरिः पतंगः पटरी

र्ययुक्तो रश्मिर्बहुविधरश्मियुक्तः आदित्यः वसुभिर्धनैः अर्वाङ्॰ आयातु आभिमुख्येनाग
च्छतु। आगतश्च स सविता बहुलां प्रभूतधनां श्रियं संपदं मे नियच्छतु नितरां ददातु। कीदृशः सवि
ता। प्रमंहमाणः अस्मद्दीयस्तुतीः प्रकर्षेण वर्द्धमानः। रश्मिर्बहुविधरश्मियुक्तः। इंद्रः प
रमैश्वर्ययुक्तः॥७॥ अष्टमीमाह॥ घृतमिति। अयं सप्तहोतृदेवो अग्निरूपः सन् मयि यजमाने। म
धुमत् घृतं मधुररसोपेतं घृतादि द्रव्यं। तेजः कांतिं। इंद्रियं चक्षुरादिसामर्थ्यं च दधातु।
संपादयतु॥८॥ नवमीमाह॥ हरिरिति। हरिरंधकारहरणशीलः। पतंगः सूर्यरूपः। पटरी तेजः
पटलवान्। सुपर्णः पक्षिसदृशः। दिविक्षयः स्वर्गनिवासी। यः सप्तहोतृदेवः। नभसा आकाशमा
र्गेण एति गच्छति। स देवो नोऽस्माकं कामवरं कामानां मध्ये श्रेष्ठं ददातु॥९॥ दशमीमाह॥ पंचाशनिति॥

१० पंचारं ॐ तुं पंचकाल्मकाःय शायस्य कालचक्रस्य तसंचारं । पृथु विस्तृतं । चक्रं संव
त्सरात्मकं कालचक्रं परिवर्त्तते परितः प्रवर्त्तते । शारिरस्य मध्ये मेघ वार्षि जलस्य मध्ये । हि
रण्यज्योतिः रश्मिसंचारेण विद्युद्रूप परिणामेन च सति सुवर्णसमानं ज्योतिर्यस्य मंडलस्य
तद्धिरण्यज्योतिः । तादृशं ज्योतिरादित्यमंडलं संवत्सरचक्रं निष्पादकमजस्रं निरंतरं अप्रमा
ऽकाशमार्गेण सर्पति शनैः संचरन् गच्छति । स ज्योतिर्मंडलाभिमानी अस्माकं कामवर्षदः सातु ॥१३॥
एकादशीमाह । सप्त युंजंतीति । सप्त संख्याकाः साकं जाना मिश्रत्रो कामुस्यर श्मिविशेषाः अश्व १०

सदृशाः । एकचक्रे एकप्रकारं परिवर्त्तं कालचक्रं युंजंति प्रवर्त्तयंति । तदेव स्पष्टीक्रियते । सप्त सं
ख्याका निनामा । निनमनयोग्यानि वंद्यानि रश्मिरूपाणि यस्यासौ सप्तनामा । अश्वो व्यापकः । एकः
सूर्यस्तु कालचक्रं वहति । त्रिनाभि । तिस्रः सत्वरजस्तमो गुणरूपा भूतभविष्यद्वर्त्तमानरूपा वा नाभ
यो यस्य वत् । अजरं विनाशरहितं । न हि कालः संसारमध्ये कदाचिद्विनश्यति । अनर्वं अपूर्वं वि
धी विनाशकः । भ्रातृव्यो वा अर्वेति श्रुतेः । तद्रहितं । न हि कालचक्रस्य कश्चिद्विनाशकोऽस्ति । येन का
लचक्रेण इमा विश्वा भुवनानि सर्वाणि भूतजातानि तस्थुः । तिष्ठंति सुखेन वर्त्तंते तस्य कालचक्रस्य [illegible]

द्वादशीमाह । मद्रुमिति । सुवर्विदः स्वर्गलोकमार्गाभिज्ञाः । ऋषयः मद्रं कल्याणं सप्तहोतृरूपमादित्यं पश्यंत
आप्यत्वेन निश्चित्यवन्ताः । तपो नशानादिरूपं दीक्षां नियमविशेषं च । उपसेदुरनुष्ठितवंतः । ततआदित्यसकाशात्ते
यं ततःत्राणमनिष्टनिवारणं बलं शरीरदृढत्वं । ओजः कांतिश्चेत्येतत्सर्वं ज्ञातं संपन्नं । ततत्स्मादिदम स्मै यजमाना
य देवा अभिसन्नमंतु अभितः संपादयंतु ॥१२॥ त्रयोदशीमाह ॥ श्वेतमिति । परमे व्योमन् उत्कृष्टे हृदयाकाशे
दृढं परमैश्वर्ययुक्तमादित्यमन्तर्हितरूपं निविविशुः निश्चितवंतः । तदनु तपत मित्यर्थः । ओदनामिदं । श्वेतं शुक्लाशास्त्र
त्वेन शुक्लवर्णं । रश्मिर्रश्मियुक्तं । योऽशुं अन्नमानं सर्वप्राणिभिः ईक्षितं देवेन पुनःपुनर्भुज्यमानं एतत्देवस्य हुक्षे कैप्यते । त्र

यं नेत्रैरं । आदित्यान्नप्राप्तेरिति स्वसारूप्येण वसनेनानाहरंत । भुवनस्य गोपां भूतजातस्य पालकं ॥१३॥ चतुर्द
शीमाह रोहिणमिति । रोहिणीः रोहितवर्णाः पिंगलाः पिंगलवर्णा अश्वमाः आपत्ताः भूमिसंबन्धेन बहुविधाः स्वयते ताः
सर्वा आपिस्थ सहिता देवस्वरूपस्यादित्यस्य रश्मिसंबंधेन मेघेनुपेशरूपत्वं परिस्यजन्ते करूपा भवंति । तदा
हरेणीः हारिकरूपेण अनमोपतं तस्याः पिंगलादिवर्णा आपरत्वरूपा भवंति ॥ हरिशब्दार्थे अन्ये भूमौ
नाथानानां नाचातरणोपानां अपां शतं सहस्राणि प्रयुतानि । शतसंख्याका बहुविधसहस्रसंख्याका
संपद्यंते वहिद्वारेण तत्र ग्रानेक प्रवाहा भवंति । तदेतत्सर्वं सप्तहोतृमाहात्म्यमित्यर्थः ॥
॥१४॥ अथ पंचदशीमाह । अयं यद्विति । अयं सादित्यः श्वेतवर्णैः रश्मियुक्तोऽस्ति सोऽयं

।चं०भा०

सर्वमिदं जगत् परिव्याप्य वर्त्तमानो ऽस्माकं प्रज्ञादिकं ददातु ॥१५॥ षोडशीमाह । श्वेतोरश्मि
रिति । श्वेतः शुक्लवर्णो रश्मियुक्त आदित्यः सर्वं जगत् समिद्धं परितो व्याप्तवान् । नादृश
॥११॥ आदित्यो महत्त्वं विश्वरूपात्मको महिम्ना दिव्यरूपेण बहुविधान् पश्वन् सृजन् सोऽस्तु प्रस
न्नित्यर्थः ॥१६॥ सप्तदशीमाह पतंगमिति । असुरः प्राणान् राति ददातीत्यसुरः पर
मात्मा तस्य मायया ऽचिंत्यशक्त्या । अक्तमभिव्यक्तं पतंगमादित्यं हृदा मनसा

हृत्पुंडरिकगतेन नियमितेनांतःकरणेन मनीषिणो वेदशास्त्राभिज्ञा महर्षयः पश्यंति
ध्यात्वा साक्षात्कुर्वंति । कवयो लौकिकचतुराभिज्ञाः पुरुषाः समुद्रेऽन्तः समुद्रस
मत्वेंतरिक्षमध्ये विचक्षते विशेषेण कथयंति । अयमादित्य उदितो मध्यान्हे
समागतं दृष्ट्वा इत्यादि व्यवहारं कुर्वंति । वेधसो विधातारो ऽनुष्ठानकुशलाः केचि
च्छ्रद्दधाना मरीचीनां पदं रश्मिमंडलं स्थानमादित्यमिच्छंति ॥ अष्टादशीमाह ॥ ॥११॥
पतंगइति । पतंग आदित्यः । मनसा स्वकीयेन प्राणिनां वाचं बिभर्ति धारयति । अ
न्तर्यामिरूपेण वाचं प्रेरयतीत्यर्थः । तथा च पौराणिका आहुः । योऽन्तः प्रविश्य मम

वाचमिमां प्रसुप्तां संजीवयत्यखिलशक्तिधरः स्वधाम्नेति ॥ तामादित्यप्रेरि
तां वाचं गर्भेऽन्तः शरीरस्य मध्ये गंधर्वो वायुरवदत् उच्चारयति । गंधर्वोऽवदती
त्युपसर्गं गंधर्वशब्दो वायुवाची । वायुर्हि ताल्वादिसंयुक्तो वाचमुच्चरयति ।
तां वायुनोच्चरितां द्योतमानां प्रकाशमानां । स्वर्यं स्वर्गस्य हेतुभूतां ॥ मनी
षां मनस ईशित्रीं । अहंकारकर्त्रीमित्यर्थः । तादृशीं वेदरूपां वाचं कवयः शा

स्त्राभिज्ञाः ऋतस्य पदे तस्य परब्रह्मणः स्थाने निपांति नितरां पालयंति ।
परब्रह्मविषयाणि वेदवाक्यानि स्तुतिभिः पठंतीत्यर्थः । तदेतत्सर्वं वा
क्यैरेकस्यादित्यस्य माहात्म्यं ॥१८॥ एकोनविंशामाह ॥ येग्राम्या इति । येग्रा
म्याः ग्रामे भवा गवाश्वादयः । विश्वरूपाः जातिभेदैर्बहुरूपाः । विरूपा वर्णादिभेदेन विवि
धाकाराः एवं बहुविधा दृश्यमानाः संतोपि पुनः पशुलोकारे एकरूपास्तान् सर्वान्स्य
अग्निरूपः सप्तहोता देवः । अग्रे प्रमुमोक्तु तत्रास्यानालभं तु चत्तु । प्रमुच्याभयं ददात्वित्यर्थः । प्रजा

चि०भा० ॥१२॥

एतद्बोधः किंचि
त्दर्शितः २

पतिः स्वकीयया प्रज्ञया संविदानः ऐकमत्यं गतोऽस्मभ्यं पशून् ददात्विति शेषः ॥१९॥ विंशीमृचमा
ह ॥ वीतमिति । नियमेन संपादयंतं यज्ञपतिं यजमानं प्रजापतिर अस्मै तं प्रकर्षेण ददीय ॥२०॥ ए
कविंशर्चमाह ॥ येषामध्याद इति । अध्यादिशब्दाः पूर्ववद्योज्याः । तेषां ग्राम्यपशूनां सप्तानां गोअ
श्वाविपुरुषगर्दभोष्ट्ररूपाणां सप्तसंख्याकानामिहास्मिन्ग्रहे रंतिः क्रीडास्तु । तद्वर्धनपुष्टिः शोभन
परंपरार्थं शोभनवीर्यार्थं च संपद्यंते ॥२१॥ द्वाविंशीमाह य आरण्या इति ॥ अरण्ये भवा आरण्याः श्वा
पदादयस्तानारण्याधिपतिर्वायुः प्रमुमोक्तु । अन्यत्सर्ववत् ॥२२॥ अथ त्रयोविंशीमाह ॥ इज्याय इति ।
इज्यायै गोधनार्थं सत्तं प्राप्तं घृतवत् घृतयुक्तं घृताकारमित्यर्थः । तादृशं चराचरं स्थावरजंगमरूपं जग

दनुगृह्णीतु गृहाहितं प्राणिनां बुद्धाववस्थितं सत्त्वहो रदेवं देवा अन्वविंदन् अन्विच्छन् लब्धवंतः ॥२३॥
चतुर्विंशीमृचमाह य आरण्या इति ॥ सप्तानामेकशफद्विखुरश्वापदपक्षिसरीसृपहस्तिमर्कटनामधे
यानां अन्यत्सर्ववत् ॥२४॥ इति माधवीये वेदार्थप्रकाशे यजुरारण्यके तृतीयप्रपाठके एकादशोऽनुवाकः ॥११॥ ॥१२॥
एतैरेकादशानुवाकैश्चातुर्होत्रियचयनमंत्रा अभिहिताः ॥ अथ नारायणनाम्ना पुरुषसूक्तनाम्ना
च प्रसिद्धीयमानोऽनुवाक उच्यते । तस्य विनियोगं महाग्निचयनाग्नौ वा आपस्तंब आह पुरस्तात्प्रतीचीं पुरु
षाहुतिं चिनोति पुरुषचितिशोभि चितिस सहस्रशीर्षा पुरुष इत्युपहितां पुरुषेण नारायणेन यजमानमुपतिष्ठत इति ब्राह्मणे

ऽपि प्रोक्तं तदाहोपस्थाने विनियोगं भारद्वाज आह । नारायणाभ्यामुपस्थानमिति । अयं चो
त्तरश्चेति द्वावनुवाकौ नारायणसंज्ञौ नारायणाख्येन केनचिदृषिणा दृष्टत्वात् । जगत्कार
णस्य नारायणाख्यस्य पुरुषस्य प्रतिपादकत्वाच्च । तत्रास्मिन्द्वादशेऽनुवाकेऽष्टादशर्चस्त
त्र प्रथमामाह । सहस्रशीर्षेति । सर्वप्राणिसमष्टिरूपो ब्रह्मांडदेहो विराडाख्यो योऽयं पुरुषः सो
ऽयं सहस्रशीर्षा सहस्रशब्दस्योपलक्षणत्वादनंतैः शिरोभिर्युक्त इत्यर्थः । यानि सर्वप्राणिनां शि
रांसि तानि सर्वाणि तद्देहांतःपातित्वात्तदीयान्येवेति सहस्रशीर्षत्वं । एवमक्षिपादेष्वपि योजनीयं । स
पुरुषो भूमिं ब्रह्मांडकोशरूपां विश्वतो सर्वतः परिवेष्ट्य दशांगुलपरिमितं देशमतिष्ठ
त्यतिक्रम्य स्थितः । दशांगुलमित्युपलक्षणं । ब्रह्मांडाद्बहिरपि सर्वतो व्याप्यावस्थित इत्यर्थः ॥१॥ द्विती
यामृचमाह ॥ पुरुष एवेदमिति । यद्भूतमतीतं जगत् । यच्च भव्यं भविष्यज्जगत् । यदिदं वर्तमानं जगत्
तत्सर्वं पुरुष एव । यथास्मिन्कल्पे वर्तमानाः प्राणिदेहाः सर्वेऽपि विराट्पुरुषस्यावयवास्तथैवाती
तानागामिनोरपि कल्पयोर्द्रष्टव्यं । उतापि चामृतत्वस्य देवत्वस्यायमीशानः स्वामी । यद्य
स्मात्कारणात् अन्नेन प्राणिनां भोग्येनान्नेन निमित्तभूतेनातिरोहति स्वकीयकारणावस्था
मतिक्रम्य परिदृश्यमानं जगदवस्थां प्राप्नोति । तस्मात्प्राणिनां कर्मफलभोगाय जगदवस्था

नि

स्वीकाराच्चेदं तस्य वस्तुतत्त्वमिति भावः॥ २॥ अथ तृतीयामाह। एतावानस्येति। अतीतानागतव
र्त्तमानरूपं जगद्यावदस्ति एतावान्सर्वोपि अस्य पुरुषस्य महिमा स्वकीयसामर्थ्यविशेषः
१२ न तु तस्य वास्तवं स्वरूपं। वास्तवस्तु पुरुषो तो महिम्नोपि ज्यायान् अतिशयेनाधिकः। एतच्च
स्पष्टीक्रियते। सर्वाणि भूतानि कालत्रयवर्त्तीनि प्राणिजातानि अस्य पुरुषस्य पादश्चतुर्थांशः। अ
स्यावशिष्टं त्रिपात्स्वरूपममृतं विनाशरहितं सत् दिवि द्योतनात्मके स्वप्रकाशरूपे व्यवतिष्ठते। यद्यपि
सत्यं ज्ञानमनंतं ब्रह्मेत्याम्नातस्य ब्रह्मण इयत्ताऽभावात् पादचतुष्टयं न निरूपयितुं शक्यं तथा

पि जगदिदं ब्रह्मस्वरूपापेक्षयाल्पमिति विवक्षया पादत्वोपन्यासः॥ ३॥ चतुर्थीमाह। त्रिपा
दिति। योयं त्रिपात्पुरुषः संसारस्पर्शरहितब्रह्मस्वरूपः सोयमूर्ध्व उदैत्। अस्मादज्ञानकार्या
त्संसाराद्बहिर्भूतः सन्नत्रत्यगुणदोषैरस्पृष्ट उत्कर्षेणावस्थितवान्। तस्य योयं पादो लेशः सोयमिह
मायया पुनराभावादभवत्। सृष्टिसंहाराभ्यां पुनः पुनरागच्छति। अस्य जगतः परमात्मलेशत्वं
भगवताप्युक्तं। विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति। ततो मायया समागत्यानंतरं विष्व
ङ् देवतिर्यगादिरूपेण विविधः सन् व्यक्रामत् व्याप्तवान्। किं कृत्वा। साशनानशने अभिलक्ष्य। साशनं १२

भोजनादिव्यवहारोपेतं चेतनं प्राणिजातं। अनशनं तद्रहितमचेतनं गिरिनद्यादिकं तदुभयं य
था स्यात्तथा स्वयमेव विविधो भूत्वा व्याप्तवानित्यर्थः॥ ४॥ अथ पंचमीमाह। तस्माद्विराडिति विष्वङ् व्य
क्रामदिति यदुक्तं तदेवात्र प्रपंच्यते। तस्मादादिपुरुषाद्विराड् अजायत ब्रह्मांडदेह उत्पन्नः। विवि
धानि राजंते वस्तून्यत्रेति विराट्। विराजो अधि विराड्देहस्योपरि तमेव देहमधिकरणं कृत्वा पुरु
षस्तद्देहाभिमानी कश्चित्पुमानजायत। योयं सर्ववेदांतवेद्यः परमात्मा स एव स्वकीयमायया
विराड्देहं ब्रह्मांडरूपं सृष्ट्वा तत्र जीवरूपेण प्रविश्य ब्रह्मांडाभिमानी देवतात्मा जीवोऽभवत्। एतच्चा
थर्वणिका उत्तरतापनीये स्पष्टमामनंति। स वा एष भूतानीन्द्रियाणि विराजं देवताः कोशांश्च सृष्ट्वा प्रवि

श्यामूढो मूढ इव व्यवहरन्नास्ते माययैवेति। स जातो विराट्पुरुषः अत्यरिच्यत अतिरिक्तोऽभूत्।
विराड्व्यतिरिक्तो देवतिर्यङ्मनुष्यादिरूपोऽभूत्। पश्चाद्देवादिजीवभावादूर्ध्वं भूमिं ससर्जेति शेषः।
अथो भूमिसृष्टेरनंतरं तेषां जीवानां पुरः ससर्ज पूर्यंते सप्तभिर्धातुभिरिति पुरः शरीराणि॥ ५॥ षष्ठीमाह।
यत्पुरुषेणेति। पूर्वोक्तक्रमेण शरीरेषूत्पन्नेषु देवा उत्तरसृष्टिसिद्ध्यर्थं साधनत्वेन यज्ञमतन्वत। कुत्र चि
त्तमनुविष्टन्। बाह्यद्रव्यस्यानुत्पन्नत्वात् हविरभावात् पुरुषस्वरूपमेव मनसा हविष्ट्वेन संकल्प्य तेन पु
रुषेण पुरुषाख्येन हविषा यदा मानसं यज्ञमन्वतन्वत तदानीमस्य यज्ञस्य वसंत ऋतुरेवाज्यमभूत् तत्र आज्यत्वे

व२

१४ नसंकल्पितवंतः। एवं ग्रीष्मऋतुरिध्मत्वेन संकल्पितः। शरत्पुरोडाशादिहविष्ट्वेन संकल्पिता। पूर्वं पुरुषस्य हविःसामान्यरूपत्वेन संकल्पः। संप्रति वसंतादीनामाज्यादिविशेषरूपत्वेन संकल्पः। इति द्रष्टव्यं॥६॥ सप्तमीमृचमाह। सप्तास्यासन्निति। अस्य सांकल्पितस्य यज्ञस्य गायत्र्यादीनि सप्त छंदांसि परिधयः आसन्। ऐष्टिकस्याहवनीयस्य त्रयः परिधयः तत उत्तरवेदिकायास्त्रयः। आदित्यश्च सप्तमः परिधिः प्रतिनिधिरूपः। अत एवाम्नायते। न पुरस्तात् परिदधात्यादित्यो ह्येवोद्यन्पुरस्ताद्रक्षांस्यपहंतीति। अत एवादिसहिताः सप्त परिधयः सप्त छंदोरूपाः। तथा समिधः त्रिः सप्त त्रिगुणितसप्तसंख्याकाः एकविंशतिः कृताः। द्वादश मासाः पंचर्तवस्त्रय इमे लोका असावादित्य एकविंश इति श्रुताः पदार्था एकविंशतिदारुयुक्तेध्मत्वेन भाविताः। यत्पुरुषं यं पुरुषं विराजोत्पन्नं पुरुषं देवाः प्रजापतिप्राणेंद्रियरूपाः यज्ञं तन्वाना मानसं यज्ञं कुर्वाणाः पशुमबध्नन् विराट्पुरुषमेव पशुत्वेन भावितवंतः। एतदेवाभिप्रेत्य पूर्वत्र पुरुषेण हविषेत्युक्तं॥७॥ अष्टमीमाह। तं यज्ञमिति। यज्ञं यज्ञसाधनभूतं तं पुरुषं पशुत्वभावनया यूपे बद्धं बर्हिषि मानसे यज्ञे प्रौक्षन् प्रोक्षितवंतः। कीदृशमित्यत्राह पुरस्तात्सर्वसृष्टेः पूर्वं पुरुषत्वेन जातं एतच्च प्रागेवोक्तं जातो अत्यरिच्यतेत्यत्र तेन पुरुषरूपेण पशुना देवा अयजंत मानसयागं निष्पादितवंतः। के ते देवा इत्युच्यंते। साध्याः सृष्टिसाधनयोग्याः प्रजापतिप्रभृतयः तदनुकूला ऋषयो मंत्रद्रष्टारश्च ये संति ते सर्वेऽप्ययजंत॥८॥ नवमीमाह। तस्मादिति। सर्वात्मकः पुरुषो यस्मिन्यज्ञे हूयते सोयं सर्वहुत् तादृशात्पूर्वोक्तान्मानसाद्यज्ञात् पृषदाज्यं संभृतं दधिमिश्रमाज्यं संपादितं दध्याज्यादिभोग्यजातं सर्वं संपादितमित्यर्थः। तथा वायव्यानंतरिक्षदेवताकान् लोकप्रसिद्धानारण्यान् पशून् चक्रे उत्पादितवान्। आरण्या हरिणादयः। तथा ये च ग्राम्या गवाश्वादयस्तानुत्पादितवान्। पशूनामंतरिक्षद्वारा वायुदेव १४

यमंत्रांतरस्याम्नानं समाम्नातं। वायवः स्थेत्याह वायुर्वा अंतरिक्षस्याध्यक्षाः अंतरिक्षदेवत्याः खलु वै पशवः वायव एवैनान्परिददातीति॥९॥ दशमीमाह। तस्मादिति। छंदांसि गायत्र्यादीनि। तस्माद्यजुस्तस्मादजायत॥१०॥ एकादशीमाह। तस्मादिति। तस्मादश्वा अजायंत ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः। अश्वा गर्दभाश्च ये केचिदूर्ध्वाधोभागयोरुभयोर्दंतयुक्ताः संति ते अस्मादजायंत। तथा गावश्चाजाश्चावयश्च ते तस्मादुत्पन्नाः॥११॥ अथ द्वादशीमाह। यत्पुरुषमिति। प्रश्नोत्तररूपेण ब्राह्मणादिसृष्टिं वक्तुं ब्रह्मवादिनः प्रश्ना उच्यंते। प्रजापतेः प्राणरूपा देवा यद्यदा पुरुषं विराड्रूपं व्यदधुः

संकल्पेनोत्पादितवंतस्तदानीं कतिधा कतिभिः प्रकारैर्व्यकल्पयन् विविधं कल्पितवंतः। एष सामान्यतः प्रश्नः। मुखं किमस्येत्यादिविशेषप्रश्नाः। त्रयोदशीमाह। ब्राह्मण इति। योयं ब्राह्मणत्वजातिविशिष्टः पुरुषः सोयमस्य प्रजापतेर्मुखमासीत् मुखादुत्पन्न इत्यर्थः। योयं राजन्यः क्षत्रियजातिः स बाहुत्वेन निष्पादितः। बाहुभ्यामुत्पादित इत्यर्थः। योयं वैश्यजातिः स ऊरुत्वेन निष्पादितः ऊरुभ्यामुत्पादितस्तथा पादाभ्यां शूद्र उत्पन्न इत्यर्थः। इयं च मुखादिभ्यो ब्राह्मणादीनामुत्पत्तिः सप्तमकांडे

मुखं किमस्यासीत् ... प्रजापतेः सकाशात् ... ॥१२॥

१५

चतुर्दशीमाह ॥ चंद्रमेति । यथा दध्याज्यादिद्रव्याणि शवादयः पशवः ऋगादिवेदा ब्राह्मणादि
मनुष्याश्च तस्मादुत्पन्नाः एवं चंद्रादयोपि देवास्तस्माद्देवादुत्पन्नाः चक्षोश्चक्षुषः ॥१४॥ पंचदशीमाह ॥
नाभ्या इति । यथा देवास्तस्मादुत्पन्नास्तथा लोकानंतरिक्षादीन्प्रजापतेर्नाभ्याद्यवयवेभ्योऽकल्प
यन्नुत्पादितवंतः ॥१५॥ षोडशीमाह । वेदाहमिति । यथोक्तविराट्पुरुषध्यानमत्र प्रतिपाद्यते एत
न्मंत्रद्रष्टा स्वकीयध्यानुभवं प्रकल्पयति । यः पुरुषः सर्वाणि रूपाणि देवमनुष्यरूपाणि विवि
च्य विशेषेण निष्पाद्य । नामानि देवोयं मनुष्योयं पशुरयमित्यादीनि कृत्वा । अभिवदन्नतैर्नामभिर
भितो व्यवहरन्नास्ते एतं पुरुषं विराजं महांतं सर्वगुणैरधिकं । आदित्यवर्णमादित्यवत्प्रकाशमानं रा१

महं वेद जानामीति ध्यानेन सर्वदानुभवामीत्यर्थः । स च पुरुषस्तमसः पारे अज्ञानात्परस्ताद्व
र्तते । अयं तु पुरुषः शास्त्रोपदेशरहितैर्मूढैरनुभवितुमशक्य इत्यर्थः ॥१६॥ अथ सप्तदशीमाह । धातेति ।
यथा धाता प्रजापतिर्यं विराट्पुरुषं पुरा जहार ध्यातृणामुपकारार्थं प्रख्यापितवान् । चतस्रः प्रदि
शश्च तु दिक्षु वर्तिनः सर्वान्प्राणिनः प्रविद्वान्प्रकर्षेण जानन्शक्र इंद्रश्च तदनुग्रहार्थं प्रख्या
पितवान् । ध्यातुरिंद्रस्यापदे पदे शास्तं विराट्पुरुषमेवमुक्तप्रकारेण विद्वान्साक्षात्कुर्वन्नरहा
स्मिन्नेव जन्मनि अमृतो मरणरहितो भवति । यदा विराट्पुरुषोहमिति साक्षात्करोति तदा १५

नीं वर्तमानदेहस्य स्वस्वरूपाभावात् तन्मरणेनायमुपासको न म्रियते । अयनायामृतत्वप्राप्तये
ऽन्यः पंथा यथोक्तविराट्पुरुषसाक्षात्कारमंतरेणान्यो मार्गो न विद्यते । न हि कर्मसहस्रैरमृतत्वसं
पादयितुं शक्यते । न कर्मणा न प्रजया धनेनेति शास्त्रात् ॥१७॥ अष्टादशीमाह । यज्ञेनेति । अत्र
कृत्स्नानुवाकतात्पर्यं संक्षिप्योपन्यस्यति । देवाः प्रजापतिप्राणरूपा यज्ञेन यथोक्तेन मानसे
न संकल्पेन यज्ञं यथोक्तयज्ञस्वरूपं प्रजापतिमयजंत पूजितवंतः । तस्मात्पूजना
त् तानि प्रसिद्धानि धर्माणि जगद्रूपविकाराणां धारकाणि प्रथमानि मुख्यान्यासन्नेव

तावतानुष्ठिः प्रतिपादकानुवाकभावार्थः संगृहीतः तथोपासनस्य फलमप्यनुवाक
भावार्थः संगृह्यते । यत्र यस्मिन् विराट्प्राप्तिरूपे नाके पूर्वे साध्याः पुरातना विराडु
पास्तिसाधका देवाः संति तिष्ठंति तं नाकं विराट्प्राप्तिरूपं स्वर्गं ते महिमानस्तदुपा
सका महात्मानः सचंते प्राप्नुवंति ॥१८॥ इति माधवीये वेदार्थप्रकाशे यजुरारण्य
के तृतीयप्रपाठके द्वादशोनुवाकः ॥१२॥ ॥ अथोत्तरनारायणस्यानुवाकस्तस्य च विनि

योगः पुरुषमेध आपस्तंब आह । उत्तरनाराय
णेनादित्यमुपस्थायेति । योयं विराड्रूपो नारा

१५

२६ यशाख्यः पुरुषः सोयमद्भ्यः संभृतः। सर्वतो व्याप्तेषु जलेषु क्षीरमध्ये मंदरवद् ब्रह्मांड
गोलकमुत्पन्नं। न केवलमद्भ्य एव किंतु पृथिव्यै रसाच्च। भूम्याः संबंधिनो यो रसः सार
स्तस्मादुत्पन्नमंडं तस्य यो यं बहिर्भागः कठिनः स पार्थिवः। परमैषं च तन्मध्य द्रवांश
आपः। यत् कठिनं सा पृथिवी यद् द्रवं तदापो यदुष्णं तत्तेज इत्यादिश्रुतेः। विश्वक
र्मणो जगत्कर्तुः परमेश्वरात् अधि समवर्तत अधिक्येन निष्पन्नो योयं ब्र

ह्मांडाभिमानी चेतनः पुमान् सोयमीश्वरांशस्तस्य विराट्पुरुषस्य रूपं चतुर्दशलो
करूपावयवसंस्थानं विदधन्निष्पादयन् त्वष्टा विश्वकर्मा जगदीश्वर एव प्रवर्तते।
पुरुषस्य विराडाख्यस्य संबंधि तद्विश्वं प्रसिद्धं देवमनुष्यादिरूपं सर्वं जगदग्रे
सृष्ट्यादौ आजानं आजातं सूर्यमंडलं॥१॥ द्वितीयामाह। ब्राह्म्यां॥२॥ तृती
यामाह। ब्रह्मांडरूपे गर्भेंतर्मध्ये प्रजापतिर्विश्वहवान् भूत्वा चरति। स च यास्ताव
न रूपेण सहं तानमनंतं ब्रह्मेत्यादिश्रुतेः। अजायमान एव तथापि मायिके
न रूपेण बहुधा स्थावरजंगमादिबहुप्रकारेण। वि[illegible]ण जायते। तस्य प्रजापतेर्योनिं जगत्कारणरू
पं आत्मस्वरूपं धीरा धैर्यवंतो योगनिरुद्धेंद्रिया महात्मा
नो जानंति। वेधसो विधातारः स्रष्टिकर्तारस्तमेवोपास्य

तद्दर्शनां मरीच्यादिमुख्यानां महर्षीणां पदं जगदुत्पादकत्वलक्षणमिच्छंति॥३॥ चतुर्थी
माह। यः परमेश्वरो देवेभ्यो देवार्थमातपति सर्वत्र प्रकाशते। देवानां देवत्वसिद्धये तद्हृदये
षु चैतन्यरूपेण प्रविशाविर्भवति। यश्च देवानां पुरोहितो बृहस्पतिर्बभूव। बृहस्पतिर्देवानां
पुरोहित इति श्रुतेः। यश्च देवेभ्यः पूर्वो जातः प्रथमतो हिरण्यगर्भरूपेणोत्पन्नः। हिरण्यग
र्भः समवर्तताग्र इति श्रुतेः। तादृशाय रुचाय विरोचमानाय स्वयंप्रकाशाय। ब्राह्मये परब्रह्मस्व
रूपाय ब्रह्मणा वेदेन प्रतिपाद्याय यवान नमो नमस्कारोस्तु॥४॥ पंचमीमाह। देवाः सर्वे अग्रे सृष्ट्यादौ ब्रह्म
विद्यासंप्रदायप्रवचनकाले ब्राह्मं रुचं ब्रह्मसंबंधि चैतन्यं जनयंतः विद्यायाः प्रादुर्भावयंतः तं ब्रह्म

तद्ब्रह्म संबोध्य अब्रुवन् वक्ष्यमाणं वाक्यमुक्तवंतः। किं तद्वाक्यमिति तदुच्यते। हे परमात्मन् यः
कश्चिद्ब्राह्मणः पुमान् त्वामेवं यथोक्तप्रकारेण विद्यात्। तस्य ब्रह्मविदः सर्वे देवाः वशे अस्मन्नध्य
धीना भवंति। स्वयं हि तेषां देवानामंतर्यामी परमात्मा भवति तस्माद्देवा एतदधीनाः। न तस्य देवा
५४ ईश्वरा इत्यर्थवाजसनेयिनो विस्पष्टमामनंति। यं वेदाहं ब्रह्मास्मीति स इदं सर्वं भव
ति तस्य ह न देवाश्च नाभूत्या ईशत आत्मा ह्येषां स भवतीति॥५॥ अथ यजुरात्मकं कं चिन्मंत्रमा
ह। ह्रीर्लज्जाभिमानिनी देवता। लक्ष्मीरैश्वर्याभिमानिनी देवता। हे परमात्मन् ह्रीश्च लक्ष्मीश्च ते तव
पत्न्यौ भार्यादिस्थानीये। अहोरात्रे पार्श्वे पार्श्वद्वयस्थे। यानि नक्षत्राण्याकाशे दृश्यमानानि तानि

रूपं तच्छरीरस्थानीयं। अश्विनो यौ देवौ तौ तत्र व्यानं विरुत्तमुखस्थानीयं। तथाविधहे वि
राट्पुरुष। इदमस्मदपेक्षितममुत्रभोगमनिषाणानुमन्यस्व देही सर्थः। अमुत्कोके इदमयमा
नगभ्यादिकं मनिषाणमयच्छ। किंबहुना सर्वमनिषाणं। एहि के मामुष्मिकं वा सर्वमिष्टं देहि
॥ ॥ इति त्रयोदशोनुवाकः॥ ॥ अथ भर्तृसूक्तास्व्यः कश्चिदनुवाकोभिधीयते। तत्र च मन्त्र
वेयेहतमिस्मिन्नूपशोना। रिहहोमानंतरं उपहोमार्थत्वेन विनियोगाद्द्रष्टव्यः। तथा चापस्तं
बः अहमस्म वह हते तत्र भर्तारिमुपजुहुयादिति। तत्र प्रथमामाह। योयं ब्रह्मांडाभिमानीदेवः सो

यं भर्ता पोषकः सन् ध्रियमाणेन तथा। मिणपरश्वरेण च यंधार्यमाणः सन्
बिभर्ति देहान्धारयति। स च सूत्रात्मरूपेण स्वयमेक एव देवस्तान्तरेषु बहुधा
शरीरानुसारेण बहुप्रकारो निविष्टोवस्थितः। अत एव प्राणविद्याप्रकरणे तच्च
शरीरानुसारेण प्राणस्यावस्थितिं कृत्वा आमनंति। यदा स देवो ब्रह्मा भारं धार
यितुमलसो भवति तदा भारमत्रैव निधायास्थमेति। अथ दत्तीनंगच्छति। यथादे
हा सूर्यमदर्शनं गतस्तथा देहपातादूर्ध्वं मिस्त्रिभेश्च पुनरिस्तुके ॥१॥ द्वितीयामाह। तमि
ति। वेदरसाभिज्ञाः पुरुषास्तमेव प्राणमस्तमाहुः। ~~[illegible]~~ यदा प्राणो देहान्निर्गच्छ

यितारमाहुः। तथा च कौषीतकिनः समामनंति। अथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्य उत्थाप
यतीति। तथान्नमेव प्राणमन्नपानस्वीकारहेतुत्वात् गोप्तारं पोषकमाहुः। तथा च छांदोग्ये अन्न
पानस्वीकारसाधनत्वं प्राणस्यामनंति। यदश्नाति यत्पिबति तेनेतरान्प्राणानवतीति। यः पुमा
नेनं प्राणस्वरूपेन अभ्युदितं नमस्यकुमार्गेणाभ्युत्थानकाले चित्ते धारयितुं वेद जानाति। स उपा
सकः पुमानन्नेतः परमेश्वरेण पोषितः। ध्रियमाणो नेन वायुना धार्यमाणः सन् विभर्ति स्वयोषि
तरान्नैपोषयितुं समर्थो भवति॥२॥ तृतीयामाह। स यदेति। एष प्राणदेवः स्वतंत्रः सन् सद्योजातमुत
तदानीमेवास्त्रममपि पुरुषमन्त्यायुषं जहाति परिसजति। एकमन्यं कंचित्पुरुषं उतो जरंतं दीर्घेणा

युषा जरां शाममपि न जहाति। एवं क्रमहः एकस्मिन्नेवादिने उतो बहुतनेकान्पि
पुरुषान्संहरति। सोयं प्राणदेवः सदमेवस्सर्वदैवान्तंत्रः उच्छ्वासनिश्वासस्मरणमरणबद्ध
मरणविषयव्यापारेषु अन्यस्वरहितः। अतोयं पार्थ्यः। अस्माकिः प्रार्थनीयः। उपो
स्य इत्यर्थः॥३॥ चतुर्थीमाह। यतोयस्मात्कारणादयं प्राणः स्त्रावभुवाविर्बभूव। सं
तत्कारणं ग्रंथुमान्वेदतानोति॥ तथा संधा च बंधमपि योवेद। इद्वशी संधीति।
सैव विधिः अर्ते। एष प्राणः ब्रह्मणात्मना सह यां संधां संदधे यं संबंधं प्राप्तवान्।

१८ हस्थमिहदेहेवस्त्व मियंतं कालमिदवसत्वमेनाद्दशीयासंधानांयोवेदत्तस्मिन्दपुरुषेकार्ये
त्वं प्राणात्मनोः संबंधंचाभिजानाने युनक्तिर्लीयानेताद्दशोपुरुषेतरां प्राप्यशयाने
नत्यपि तत्रागंप्राणोरक्षतेकिंउक्ते ॥ पूर्व्येषुपुर्वकृतकर्मभिः संपादितेषुहःसुवदुख्यि
दिवसेषुनेनंजहाति एनंजीर्णपुरुषंस प्राणेनपरित्यजति ॥ ७ ॥ पंचमीमाहत्वामपद्भतिः
हे प्राणत्वंवायुरूपं सर्वाद्भ्रापोऽनुचरति ॥ यत्रवायुप्रबलंवातितत्रैव अधिकंवर्षति
वर्त्तते ॥ तत्र दृष्टांतः ॥ यथाजानाः तीः वत्सवत्सम भिक्षागावःपयसापुनःपुनाः स्वकीयेन
क्षीरेणपावयंत्यःपोषयंत्योवत्समनुचरंतितद्वदितिद्रष्टव्यं ॥ हे प्राणत्वंरूपंचाहं हविषांवो

ढारम ग्निंसमिद्धेसम्यक्दीपयसि ॥ वायुनाह्यग्निर्दीप्यते ॥ तथात्वमेवमातरिश्वावायुरूपः
सन्प्रजानांप्रा। त्यधारयितासि ॥ ५ ॥ षष्ठीमाहत्वंयज्ञइति ॥ हे प्राणत्वंयज्ञप्रवर्त्तकत्वेन
यज्ञरूपोसि। प्राणस्यवायुरूपत्वाद्यज्ञप्रवर्त्तकत्वं ॥ एतच्चाम्नातं ॥ वाताद्वा अध्वर्युः
यज्ञं प्रयुंक्ते इति ॥ सोमादिनासोमयोपिसोमयागोपिसमेव। सर्वक्रियाणांवायुप्रेरितत्वात् ॥
किंच सर्वेदेवास्त्वयहवमाज्ञानं प्रसायंति। अग्नागुच्छंति। वायुनायागक्रियापामर्वर्तितायां
हविर्भिर्देवा आगच्छंति। किंचदेवतारूपेणत्वमेको। सितथापिबहुन्देहाननुप्रविष्टः। तत
दानुकूल्येनपथ्यग्रूपाशिघ्रसानत्रतायस्थितः हे प्राणतेतुभ्यंनमोस्तु। मेममसुहवणःधी

ह अष्टमीमाह ॥ प्राणापानाविति ॥ हे प्राणापानौवायुसंविदानौपरपस्परमैकमत्यंगतौजहितं अस्मद्भुंपु
रित्यजतं ॥ अमुष्यमदीयशरीरंसुप्राणेनमासंगसाथासंगतोमाभूतं ॥ किंचइत्थमदीयेनमंत्रेण
संविदानोएकमिसंगत्तौदेवोप्राणापानवायुवां नमदीयंशरीरंवधारयंदत्तेमत्तंप्रयच्छतं ॥ तंशत
हैनामिनाश्रयस्मि ॥ ८ ॥ नवमीमाह ॥ असदिति ॥ असद्व्यक्तंजगत्कारणंबीजंततप्रथममाका
शात्मनाव्यक्तरूपेणोत्पादितवान् ॥ ससर्वेपिदेहास्यप्राणस्यगोपोरक्षकःपवेत्प्र
तो हिशरीरेप्रविश्यगुप्तोवर्त्ततेयावदायुस्तावत्कालंतत्रावस्थायय दादेहरूपंतत्पारंभंदे

संद्भयते असत्सोभवतितदानीमेवतंभारंपारास्यपरित्यज्यपुनरपिदेहोत्पत्तेः प्राग्वा
स्तमेतिअदर्शनंगच्छति ॥ १० ॥ दशमीमाह। तद्वैलमिति। यद्यदालंभुजोभोगानूकेरिव्यमाणः सुर
नवदेवाभवदिद्रवर्णिनश्चक्षुरादीनूदीप्यमानानूपदार्थानूप्राणयः प्रकर्षेणचेष्टिवानसि जदै
तदानीमेयहेप्राणोऽभवः प्राणयत्तिप्रकर्षेणचेष्टयतीतिव्युत्पत्त्याप्राणनामकोऽभूः ॥ कीदृशस्त्वं प्रजा
पतेर्महानूभोगः। उपसंतभोगहेतुः ॥ १०॥ ॥ इतिचतुर्दशोनुवाकः ॥ ॥ अथमस्युरुत्क्रान्त्यानुव
कोऽभिधीयते। इतआरभ्यसप्तानामनुवाकानांब्रह्ममेधेविनियोगंभारद्वाज आह।
मस्युरुत्क्रान्त्यानुशंसनंसौम्यासंगाहनंसौर्येणादिसोपस्थानमीयुष्टइत्यवगाहनंज्योतिष्म
तीभिरुपोषणंचित्र उसंतानेतिहा। विराडुतिः प्रयासायस्वाहेतिस्रुवाहुतिरिति॥ ॥ ॥

रा

१९ तत्र प्रथमसूक्ते प्रथमामृचमाह। हरिणमिति। हरिं हरणशीलं प्राणापहर्त्तारं मृत्युं देवाः सर्वे देवा
अपनुयंत्यानुकूल्येन यंति। न कोपि देवो मृत्युमपहर्त्तुं क्षमते। कीदृशं हरिं। हरंतं। आयुर्वै वस्तानि नय
हरंतं। अतएव विश्वस्मिन्सर्वस्य जगतः स्वामिनं। मतीनां मननीयानां देवानां मध्ये स्वयं श्रेष्ठं। अग्नि
कर्मलिप्सरूपं सम्मानरूपं। अनुमाद्दुं अमम जातं मामनु जेषी। आगाद्यामि मुख्येन प्राप्नोति। ततो हे
मृत्यो बहुल तुष्टः सन् अपर्यंतं मा विवधीः मदीयं मार्गं मा विनाशय। किंतु चिरं समस्त मरणरूप विनाशात्
पराक्रमं कुरु॥१॥ द्वितीयामाह। माहि दद्दति। हे मृत्यो त्वं माछिद्रः। मदीयं सप्त्र स्यापत्यस्य ... दैवै
मावधीर्मे ममवधमविना काषीः। मदीयं बलं मा विवृहो मा विनाशय। मा आमो षीरमदीयं दीयं वीर्येण मा वि
वृहः। मदीयां प्रजां पुत्रादिकां मारीरिषः। मा हिंसीः तामा ... हेऽग्ने देव मदीयमायुस्त्वमारीरिषो मा विनाशय॥

न्यपश्यत्संमनुष्येषु मरुत्वान् तस्मै हविषा विधेमुपरि नरेम॥२॥ तृतीयामाह। सद्य इति। सद्यश्चास्मि
नेव प्रक्षेचक्रमाना यम्भय हंत वेप्रवेपानायूतेन भयेन प्राणिनां कंपयित्रे प्राणिनो हि मृत्योर्निमि
हणे नैव भीणाः कंपते। अस्मै दिवाय नमः सर्वे आशाः सर्वा दिशः प्राप्नुवन्त। सर्वे दिग्वर्तिनः प्राणिनो
मृत्युमानंताः अभ्यः प्रकंपिणो भवंति। कामेन मृत्यो रिषया पुनरजनयन्त। पुनः पुनरप
त्यानि जनयंति। मृत्यो प्रतिकूले तस्मिन् उत्पादितान्यपत्यानि तदानीमेव म्रियंते। अतो मृत्युमारा १९
ध्य तदिच्छानुसारयंतिनोऽपत्यान्युत्पादयंति॥३॥ ६॥ ६॥ ६॥ ६॥ ऽऽऽऽऽऽ॥ ६॥ ६॥

चतुर्थीमाह। कामेनेति। कामेन मृत्यो रिषया मे कामस्यागानु मदीय मनोभीष्टं वस्तु आगच्छ
तु। मदीयं हृदयं मृत्यो हृदयात् मृत्युं चितानुकूल्येन वर्त्ततामिति शेषः। अतो मृत्योरनुग्रहे सति
अमीषां महीं द्वियाणां यत् अदः। प्रियं यदि दृष्टं त्वमभीष्टं तद्वस्तु मामभिलक्ष्य। उपसमीपे एतु आग
च्छतु॥४॥ पंचमीमाह। परंमृत्योइति। हे मृत्यो देवयानादितरो यः पंथास्ते स्वः तं पंथानं स्वकीय पंथा देव
यानादितरं तं मार्गं मनुपरे हि अनुक्रमेण प्राप्नुहि। चक्षुष्मते साधुदर्शिने। श्रृण्वते अस्मान्हिता
पनां श्रोत्रे ते तुभ्यमेकं वचनं ब्रवीमि। नो अस्मदीयां प्रजां पुत्रादि रूपां मारीरिषः मा विनाशय। उता पिच

वीरान्भ्रान्‌भ्रात्यान पि मारीरिषः॥५॥ षष्ठीमाह। प्रपूर्व्यमिति। यो मृत्युर्मनुष्याणां मनुष्यजातीय
कानां प्रजानामेकराट् एक एव राजा। तादृशमहं यजे पूजयामि। कीदृशो यजेहं मनसा प्रवंदमानः प्र
कर्षेण नमस्कुर्वाणः। नाधमानो पेक्षितफलं याचमानः। कीदृशं मृत्युं। पूर्व्यं प्राणिभ्यः पूर्वस्मिन्का
ले भवं। चर्षणीनां मनुष्याणां वृषभं कामाभिवर्षक्षमं। कृतस्य प्रथमं जातः सत्यस्य पूर्व ब्राह्मणः प्रथमो
त्पन्नं कार्यं॥६॥ इति पंचदशोऽनुवाकः॥ ॥ अथ सूर्योपस्थाने विनियुक्तं मंत्रमाह। तरणिरिति। हे सूर्य
त्वं तरणिः अंधकारोत्तरणहेतुः। विश्वदर्शतः। विश्वैः सर्वैः प्राणिभिर्दर्शनीयः। ज्योतिष्कृदसि
सर्वस्मिन्लोके प्रकाशकोऽसि। विश्वं सर्वं जगद्रोचनं दीप्यमानं यथा भवति तथाऽभा

२० सिञ्चन्ति तः प्रकाशयसि। अग्निष्टोमे योनियमेनातियाग्यरूपोऽयं होऽस्तीति तादृशं हे ग्रह भ्राजस्व तेदी
प्तियुक्तायपथो क्रमहिमोपेतायसूर्यायित्वां प्रणयामि। अनन्तरं तदर्थमुपयामगृहीतः। उपयामेन का
येन मंत्रेण गृहीतोऽसि। एष ह विधानमेउपस्थ प्रदेशोऽस्ति तव योनिः स्थानं। अतो भ्राजस्व तेदीप्तिमते
सूर्याय तवा तत्र प्रदेशे सादयामि। ईदृशो यमतिग्राह्योऽयं पश्चात्सूर्याय गृह्यते किं वा कर्त्त्यं तस्य माहात्म्य मितो
नमुपस्थानकाले स्तूयते अथोग्र हेपन्यासः। लिंगवशोत्तवस्यातिग्राह्यग्रहणेऽपि अयं मंत्रो विनियुज्यते।
॥२॥ इति षोडशोऽनुवाकः॥ ॥ अतदाह स्थानसमीपे वटंरचोलाजलं प्रक्षिप्य तेन सिंचनं सं

गाहनं तत्र विनियुक्तो। नवमीमृचमाह। आप्यायस्वेति। हे मदिंतमातिशयेन हर्षयुक्त सोम। वि
श्वाभिरूतिभिः सर्वप्रकारैरस्मदीय रक्षणैराप्यायस्व सर्वतो वर्द्धस्व। नोऽस्मान् प्रति सप्रथस्तमः। अति
शयेन प्रथायुक्तो भव॥ ॥२॥ इति सप्तदशोऽनुवाकः॥ ॥ अथावगाहने विनियुक्ता मृचमाह। ईयुरि
ति। ये मर्त्त्यासो मनुष्याः व्युच्छंतीं प्रभातं कुर्वतीमुषसमुषःकालदेवतां। पूर्वतरामितरेभ्यो संतं पूर्वाम
पश्यन् पश्यंति। ते मनुष्या ईयुस्तां देवतां प्राप्नुवंति। अस्माभिरूनु अस्माभिरपि अनुक्षिप्रं प्रतिचक्ष्याभू
त्। प्रसक्षं दर्शनीयाभूत्। येन्येपि अपरीषु अपरेरात्रेषु रात्रीणामवसानेषु पश्यान् पश्यंति। ते अ २०

नेयंतिते पि देवतां सर्वदा प्राप्नुवंति॥१८॥ ॥इत्यष्टादशोऽनुवाकः॥ ॥ अथोपोषणे विनियुक्तानि
यजूंष्याह। ज्योतिष्मतीमित्यादि। प्रेतं दग्धुं या समित्प्रक्षिप्यते तां संबोध्योच्यते। हे समित् त्वामस्य प्रेत
स्योपरिसादयामि स्थापयामि। ज्योतिष्मत्यादिभिर्विशेषणैः समिन्निष्ठया ज्वालया उत्तरोत्तराभिवृ
द्ध्या अवस्था विशेषा उच्यंते। अल्पप्रकाशोपेता ज्योतिष्मती। ईषदधिकप्रकाशोपेता ज्योतिष्कृता त
तोप्यधिकप्रकाशोपेता ज्योतिचिति। एवं भास्वत्यादिषु योजनीयं। मन्त्रमूले निदह्यमानकाष्ठध्वनेरनुक
रणं। लिंगानुसारेणायं मंत्रस्तत्को पधाने विनियोक्तव्यः। इत्येकोनविंशोऽनुवाकः॥ ॥ अथस्रुवाहुति

मंत्रानुवाक उच्यते। तत्र द्वादशमंत्रानाह प्रयासायेति। प्रेतस्य यमलोकबाधका देवताविशेषाः प्र
यासादिशब्दवाच्यास्तन्निर्वचनानि तु यथायोगमुन्नेयानि। तस्यै तस्यै देवतायै स्रुवेण गृहीतमिदमा
ज्यं स्वाहा सुष्ठु समर्पितं हुतमस्तु॥ ॥ इति विंशोऽनुवाकः॥ ॥ अथ राजगवीह विषाहोमार्थमंत्रानुवाक
उच्यते। तत्र नव मंत्रानाह। चित्तमिति॥ अत्र चित्तीयंतादि चितादिशब्दा देवताविशेषवाचिनः अत
ना विशेषं परितोषयामीति वाक्यशेषः। एवं सर्वत्र योजनीयं। तदेवमस्मिन्नप्रपाठके ब्रह्मचि
तिब्रह्ममेधयोरंगभूता मंत्रा उक्ताः। चातुर्होत्रीयचितिब्रह्मवेचतुर्होतार इत्याम्नातानस्यां

ब्रह्मचितो चितिः स्वगियादयः सुवर्णं घर्मं मिस्तं तानुवाकाः विनियुक्ताः। ब्रह्ममेधे तु अनेनो पिपि
पाठको विनियुक्तः। आहिताग्नेर्यो देहनासंस्कारः सोऽयं पितृमेधः। आहिताग्निः सति यो ब्र
ह्मतत्त्वं जानाति स तीर्भिः रूपोषणं नारायणाभ्यामुपस्थानं तस्य देहनादिसंस्कारो ब्रह्ममेध इत्युच्य
ते। अस्मिन् ब्रह्ममेधे प्रपाठकस्य विनियोगं भरद्वाज आह। अथातउत्तरं ब्रह्ममेधं व्याख्या
स्यामो यं ब्रह्ममेध इत्याचक्षते थाप्युदाहरन्ति द्विजातीनामपवर्गार्थं स्तत्त्वदर्शिभिः। अ

भिस्तपसा योगाद्दृष्टं तं पुरुषोत्तमं। होतृं अपि तृमेधं च संसृज्य विरुत्तरः। विहितस्तु स
मासेन कृत्स्ना मुत्तमः क्रतुरिति तस्य गृहे होत्रभिर्होमो भर्तृसूक्तेन भर्तृसंप[illegible]लीभिरूपसं
वेशनं दक्षिणाप्रतिग्रहे निर्मार्गो हृदये हिरण्यशकलान्संभारयजुर्भिः पात्रचयनं ज्योतिष्म
तीभि रूपोषणं नारायणाभ्यामुपस्थानं ब्राह्मणा एकहोतेति चरकमुंचनं चितप्रसंतानं नेति
ह वि राहुतिः प्रयासाय स्वाहेति स्कवाहुतिर्मृत्युसूक्तेनानुशंसनं सौम्या संगाहनं सौर्येणा

दित्योपस्थानमीध्यावगाहनं समानमतऊर्ध्वं पैतृकमाय श्वोदनप्राशनांतं परं ब्रह्म
त्याचक्षते मन्त्रसाधारणेकर्मशाने प्रयुंजीत नानाचार्याय द्विजातीनामेव संतिष्ठते
ब्रह्ममेधः॥ ॥वेदार्थस्य प्रकाशेन तमोहार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्या
तीर्थमहेश्वरः॥१॥ इति श्रीमाधवीये वेदार्थप्रकाशे यजुरारण्यके तृतीयप्रपाठके एक
विंशोनुवाकः॥ २१॥ शोभननामसंवत्सरे आषाढमासे कृष्णपक्षे पंचम्यां मंदे लक्ष्मणविद्या
धरेण लिखितं स्वार्थं॥ ॥ ७ ॥ यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया। यदि शु
द्धमशुद्धं वा मम दोषो न दीयते॥ ॥

॥ इदंपुस्तकंलक्ष्मणविद्याधरस्य ॥